Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री दयाविमलजि जैनग्रंथमाला ( २२ ).

श्रीमत्पण्डितकीर्तिविमलगणिशिष्यपण्डितलक्ष्मीविमलगणिविरचितः

# ॥ श्रीसाधारणजैनस्तोत्रसंग्रहः ॥

संग्राहकः—श्रीमत्पन्न्याससौभाग्यविमलगणिशिष्यपन्न्यासमुक्तिविमलगणिः

प्रकाशकः—श्रीराजनगरस्थश्रेष्ठिमनसुखभ्राताप्रतोलीनिवासिश्रेष्ठिभगुभ्रातात्मजजमनाभ्राताभिधगृहिवर्यद्रव्यसाहाय्येन
मुद्रयित्वा प्रकाशितश्च.

श्रीवीरनिर्वाणात् २४४५. ई॰ सन १९२०. विक्रमार्क १९७६.

प्रथमावृत्तिः. मूल्यं वांचनमनन. प्रति ५००.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घीकांटावाडी–राजनगरे ( अमदावाद )
श्री " जैन एडवोकेट " मुद्रणालये
शा. गोकुलदासपुत्रचमनलालेन मुद्रितम्

पुस्तकप्राप्तिस्थानम्—
झवेरी चंदुलाल मोहनलाल कोठारी.
ऑ. सेक्रेटरी–श्रीदयाविमलजि जैनग्रन्थमाला.
ठे. दादासाहेबनी पोळ—अमदावाद.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री दयाविमलजि जैनग्रंथमाला ( २२ ).

श्रीमत्पण्डितकीर्तिविमलगणिशिष्यपण्डितलक्ष्मीविमलगणिविरचितः

# ॥ श्रीसाधारणजैनस्तोत्रसंग्रहः ॥

संग्राहकः—श्रीमत्पन्न्याससौभाग्यविमलगणिशिष्यपन्न्यासमुक्तिविमलगणिः

प्रकाशकः—श्रीराजनगरस्थश्रेष्ठिमनसुखभ्रातापतोलीनिवासिश्रेष्ठिभगुभ्रातात्मजजमनाभ्राताभिधगृहिवर्यद्रव्यसाहाय्येन मुद्रयित्वा प्रकाशितश्च.

श्रीवीरनिर्वाणात् २४४५. ई० सन १९२०. विक्रमार्क १९७६.

प्रथमावृत्तिः. मूल्यं वांचनमनन. प्रति ५००.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घीकांटावाडी–राजनगरे ( अमदावाद )
श्री " जैन एडवोकेट " मुद्रणालये
शा. गोकुलदासपुत्रचमनलालेन मुद्रितम्

पुस्तकप्राप्तिस्थानम्—
झवेरी चंदुलाल मोहनलाल कोठारी.
ऑ. सेक्रेटरी–श्रीदयाविमलजि जैनग्रन्थमाला.
ठे. दादासाहेबनी पोल—अमदावाद.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ऐँ नमः ॥

॥ श्रीमत्पण्डित[illegible]र्त्तिविमलगणि[illegible]शिष्यपण्डितलक्ष्मीविमलगणिगुम्फितम् ॥

श्रीभक्तामरस्तोत्रचतुर्थपादपूर्त्तिरूपं

# ॥ श्रीशान्तिनाथजिनस्तोत्रम् ॥

**वसन्ततिलकावृत्तम्**

**श्रीशान्तिमङ्गिसमवायहितं सुरेन्द्रा, लोकान्तिका इति गिराभिदधुर्यमाशु ।**
**तीर्थं विधेहि परिहाय नृराज्यभोगा—वालंबनं भवजले पततां जनानाम् ॥ १ ॥**

श्रीशान्तिमिति । लोकान्तिका सुराणां देवानामिन्द्रा अधिपाः यं श्रीया विशिष्टः शान्तिस्तं श्री शांन्तितीर्थेश्वरं आशु [illegible]ीघ्रमिति, गिरा वक्ष्यमाणवाण्याऽभिदधुः कथयामासुः; कीदृशं श्री शान्ति? अङ्गं शरीरमस्ति येषां तेषां समवायः समूहस्तस्यहितस्तं, किमित्यभिदधुस्तदाह नृणां मनुष्याणां राज्यं नृराज्यं च भोगाश्च तौ परिहाय त्यक्त्वा भवः संसार एव जलं तस्मिन् पतन्तीति पतन्तस्तेषां निमग्नानां जनानां आलंबनमाश्रयं तीर्थं विधेहि कुरु ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शक्रार्च्यपादकमलं विमलप्रतापं, व्यापादिताखिलखलारिनृपेन्द्र वर्गम् ।
क्षीणाष्टकर्मवरचक्रभृतां त्रयाणां, स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २ ॥

शक्रेति । तं जिनानामिन्द्रः, तं अहमपि स्तोष्ये स्तुतिविषयं क्रिये, किल ननु कथं भूतं जिनेन्द्रम् ? शक्रैः अमरेन्द्रैरर्च्यं पादकमलं यस्य तं देवेन्द्रपूजितचरणकमलं । पुनः कीदृशं ? व्यापादिता मारिता अखिलाश्च समग्राश्च ते खलाश्च दुष्टाश्च तेऽरयश्च रिपवश्च ते नृपेन्द्राश्च तेषांवर्गः समूहः येन तं विनाशितसमस्तदुष्टशत्रुराजसमूहं । पुनः कीदृशं? क्षीणानि नष्टानि अष्टकर्माणि येषां ते वराणि च श्रेष्ठानि च तानि चक्राणि च तानि बिभ्रतीति क्षीणाष्टकर्माणश्च ते वरचक्रभृतश्च तेषां त्रयाणां त्रिसंख्याकानां मध्ये प्रथम मादिमं । पुनः कथं भूतं ? विमलः निर्मलः प्रतापः पराक्रमः यस्य तं ॥ २ ॥

श्रुत्वेतीति वार्षिकमदाः प्रतिपादनं त्वं, भव्याय पापवनवह्निमृतायमानम् ।
सारं स्वभावसुखदं जिन ! तत्र दान–मन्यः क इच्छति जन सहसा ग्रहीतुम् ? ॥ ३ ॥

श्रुत्वेतीति । इति पूर्वोक्तरीत्या प्रतिपादनं देवेन्द्राणां वचनं श्रुत्वाऽऽकर्ण्य त्वं भव्याय कल्याणाय तत्र नगर्यां वार्षिकं वर्षप[illegible]नं दानमदाः दत्तवानसि । कथं भूतं दानं ? पापवनस्य दुश्चरितारण्यस्य वह्नि तद्दहनेऽग्निरूपं । पुनः कथं भूतं ? अमृतमिवाचरतीत्यमृ[illegible]ानं सुधासदृशं । पुनः कथम् भूतं ? सारभूतं, पुनः कथं भूतं ? स्वभावेन दाननिष्ठरूपरसादिधर्मेण सुखमानंदं ददातीति स्वभावसुखदं, हे जिन ! अन्यस्त्वत्सकाशाद्भिन्नः कः जनः मनुष्यः प्रतिपादनं सहसाऽकस्मात् ग्रहीतुमिच्छति ? न कोऽपीच्छतीत्यर्थः ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**आत्तं वृतं युगरस६प्रमितं सहस्त्रं, स्त्रीणां (६४०००) त्वया निहितमुक्तिहृदाविहाय ।**
**त्वामन्तरेण वनितोदभृतं किलान्यः, को वा तरितुमलमम्बुनिधिं भुजाभ्याम् ॥ ४ ॥**

आत्तमिति । हे जिन ! निहितं स्थापितं मुक्तौ मोक्षे हृद् चित्तं येन त्वया युगं च रसाश्च तैः प्रमितं युगं चतुष्टयसंख्या, रसः षट्, संख्याऽंकानां वामतो गतिरितिन्यायेन चतुः षष्टिपरिमित स्त्रीणां भार्याणां सहस्त्र सहस्त्रसंख्यां विहाय त्यक्त्वा व्रतं आत्तं ग्रहीतं, त्वामन्तरेण त्वद् विना वनिताः स्त्रियस्तदेवोद् जलं तेन भृतं पूर्णं अंबुनां जलानां निधिं समुद्रं भुजाभ्यां बाहुभ्याम् तरितुं तर्तुं अन्यस्तदन्यः को वा किल निश्चयेऽलं समर्थः ? न कोऽपीत्यर्थः ॥ ४ ॥

**आदाय नाथ ! चरणं त्रिजगत्पिता त्वं, मोहाधिमत्तनुमतोऽपि चिकित्ससे स्म ।**
**चित्रं न तत्र गदिनो हि पितेव वैद्यं, नाभ्येति किं निजशिशोः परिपालनार्थं ? ॥ ५ ॥**

आदायेति । हे नाथ ! स्वामिन् ! त्वं पितेव चरणमादाय चारित्रं गृहित्वा मोहेनाधिमद ज्ञानेनाधिष्ठिता तनु र्देहो यस्य तस्यापि मोहरहित प्राणिन एव चिकित्सा क्रियत इति, नापि तु मोहव्याप्तदेहस्यापीत्यप्यर्थः चिकित्ससे स्म । मोहात्मकरोगपरीक्षां करोषि यत् तत्र कार्ये चित्रमाश्चर्यं न कुतो नाश्चर्यं ? तत्राह यतस्त्वं त्रिजगतां पिता जनकः, पित्रा रोगिणो बालकस्य रोगपरीक्षाकार्यैव हि यस्मात् पिता गदो रोग अस्यास्तीति गदीतस्य निजश्चासौ शिशुश्च तस्य स्वबालकस्य परितः समन्तात् पालनायेति परिपालनार्थं रक्षणार्थं वैद्यं नाभ्येति न प्राप्नोति किं ? अपि तु प्राप्नोत्येव, त्वं सर्वजगत्पिताऽतस्त्वया मोहवतां चिकित्साकार्यैव तत्राश्चर्यं किमिति भावार्थः ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वं व्रतं क्षितिभृतो जगृहुस्तवानु, तत्कारणं करणनागहरे ! त्वमेव ।
आल्हादयत्यपि वनं सुरभौ जनात् यत्, तच्चारुचूतकलिकानिकरैकहेतुः ॥ ६ ॥

सर्वमिति । क्षितिं भूमिं बिभ्रतीति क्षितिभृतो राजानः तवानु तव पश्चात् सर्वं पूर्णं व्रतं जगृहुः । गृहीतवन्तस्तत्र कारणं करणानींद्रियाणि तान्येव नागाः गजास्तेषां निपातने हरि सिंह इन्द्रियगजनिवारणासिंह त्वमेवासि। यत् यस्मात् वनमरण्यं सुरभौ वसन्ते जनान् लोकान् आल्हादयति सुखयति, तदपि तत्रापि चार्व्यश्चताश्चूतकलिकाश्च तासां निकर एवैकहेतुः सुंदराम्रकोरक समूह एव प्रधानो हेतुः ॥६॥

अज्ञानमाशु कठिनं दलितं त्वया त–द्ध्यानज्वलज्ज्वलनजोस्रमयेन विश्वम् ।
ज्ञानेन सोज्वलगुणेन हि पञ्चमेन, सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ७ ॥

अज्ञानमिति । हे जिन ! त्वया ध्यानमेव ज्वलदसौ ज्वलनश्च प्रदिप्तवह्निश्च तस्य जोस्र प्रचुरं जोस्रमयं तेन ध्यानात्मक प्रज्वलिताग्रिकांतिमयेन पंचमसंख्यांकेन ज्ञानेन केवलज्ञानात्मकेन सम्यगुज्वलः सोज्वलः सचासौगुणश्च सोज्वलगुणस्तेन विश्वं समग्रं कठिनं निबिडं तदज्ञानं आशु शीघ्रं दलितं विनाशितं । कमिव ? सूर्यस्यांशवस्तैर्भिन्नं शर्वर्यां भवं शार्वरं रात्रिभवमंधकारमिव ॥ ७ ॥

मान्यानि तानि विबुधैः कमलानि कान्त्यं, गच्छन्ति तत्पदमितानि च यानि योग्यम् ।
उच्चं त्रिषक्तसुरनाथशिरः परं न, पद्माकरेषु जलजानि विकाशभाञ्जि ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मान्यानीति । कांत्यं सुंदरं योग्यं तस्य तीर्थेश्वरस्य पदं चरणं यानि कमलानि तानि प्राप्तानि तानि कमलानि विबुधैः यथा मन्यान्यादरणीयानि, तथा उच्चं सम्यक्तया विषक्तं चरणे संबद्धं सुराणां देवानां नाथस्य स्वामिनः शिरः मस्तकं परं श्रेष्ठं न मन्यते, यद्यपि भगवत्पदप्राप्ति उभयोः समाना तथापि कमलेषु देवानामधिका मान्यताऽधिकादरलाभेन हेतुना पद्मानां कमलानां आकरेषु खनिषु जलेषु जातानि कमलानि विकासं फुल्लतां भजतीति विकासभांजि किं, विकासं भजन्ति किं । अथवा तत्पदेन मितानि परिमितानि यानि कमलानि देवैर्यथामान्यानि भवंति, तद्वत् सम्यक् संबद्धदेवनाथशिरः परं मान्यं न भवति, तर्हि जगत्यामियं रीतिर्यस्यान्येषामपेक्षयाऽधिकादरः स आनंदबाहुल्यात् विकसितो भवति ह्यत्रापि देवनायकशिरोऽपेक्षया विशेष मान्यता लाभात् कमलानि विकासवंति किमित्युत्प्रेक्षते स्तोत्रकारः ॥ ८ ॥

मर्त्योऽन्तिके व्रजति तेऽमृततां मुनीन्द्र–स्योत्पन्नसारगुणकेवलदर्शनस्य ।
मुक्त्याङ्गनारमण ! वारिधरस्य शुक्तौ, मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ९ ॥

मर्त्य इति । मुक्तिः एवांगना सिद्धिभार्या तस्या रमण स्वामिन् उत्पन्नो जातः सारगुणः श्रेष्ठगुणः केवलदर्शनं केवलज्ञानात्मकः यस्य मुनीनामिन्द्रस्य ते तव अन्तिके समीपे मर्त्यः मनुष्यः अमृततां सुधास्वरूपतां जन्ममरणरहितां वा मोक्षे जन्ममरणराहित्यात् व्रजति याति । वारीणि धरतीति वारीणिधरस्तस्य मेघस्योदानां जलानां बिन्दुः कणः शुक्तौ शुक्तिकायां मुक्ताफलस्य मौक्तिकस्य द्युतिं कान्तिमुपैति प्राप्नोति । ननु किल यथा शुक्ति सानिध्यात् मेघबिन्दु मौक्तिकरूपतां प्राप्नोति तद्वत्तव सानिध्यात् मनुष्यो मोक्षरूपतां प्राप्नोति इति भावः ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्पादपद्ममभिपूज्य भजन्ति पाद्म्यं, पद्मानि किं तदुचितं न वितीर्ण वित्त ? ।
ब्रह्मस्वरूपमय ! तस्य हि सेवया किं ?, भूत्याश्रितं य इह नात्मसमं करोति ॥ १० ॥

त्वदिति । वितीर्णं दत्तं वित्तं धनं येन तत्संबुद्धौ तव पादावेव पद्मं चरणकमलं अभिपूज्य पूजयित्वा पद्मानि कमलानि पद्मस्यभावः पाद्म्यं पद्मत्वं भजन्ति तत्किं उचितं न ? अपि तूचितमेव ब्रह्मस्वरूपप्रचुरः ब्रह्मस्वरूपमयः तत्संबुद्धौ । हे ब्रह्माकारवृत्तिमय ! यो जन इह जगति आश्रितं स्वसेवकं भूत्या संपदाऽऽत्मना समं तुल्यं न करोति तस्य सेवया किं फलं ? किमपि फलं हि नास्ति, हि निश्चितं इति हेतोः तव पादपद्मसेवकानां कमलानां पद्मत्वसंपादनं युक्तमेवेत्यर्थः ॥ १० ॥

पीत्वा वचस्तव नृभिर्न पिपास्यतेऽन्य–दस्तसमानरसमात्त नयं गताघ ? ।
मिथ्यादृगुक्तमृभुसिन्धुपयः पिबानां, क्षारं जलं जलनिधेरशितुं क इच्छेत् ? ॥ ११ ॥

पीत्वेति । गतमघं यस्मात्तत्संबुद्धौ हे गताघ ! पापरहित ! अस्त अस्तमित समानश्चासौ रसश्च समानरसः, शत्रुमित्रयोः समानदृष्टिता, न समानरस असमानरस, यस्मिन् तत् । आप्तो नयो येन तत् । प्राप्तनीतिमार्गं, तव वचः वचनं, पीत्वा पानं कृत्वा नृभिः मनुष्यैः अन्यत् मिथ्यादृष्टिवचनं न पिपास्यते न पीयते । ऋभूणां देवानां सिन्धुः नदी तस्याः पयः पानीयं पिबन्तीति तेषां मंदाकिनीजलपिबानां मध्ये को मनुष्यः मिथ्यादृशा मिथ्यादृष्टिनोक्तं कथितं वचनात्मकं जलानां निधिः तस्य समुद्रस्य क्षारं जलं अशितुं पातुमिच्छेत् ? न कोऽपीच्छेत् ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चन्द्रः कलङ्कभृदहर्पतिरेव ताप-युक्तः किलार्द्धतनुतन्विरुमापतिश्च ।
विश्वेष्वशेषगुणभाक् शमभावपूर्ण, यत्ते समानमपरं न हि रूपमस्ति ॥ १२ ॥

चन्द्रेति । चन्द्र इन्दुः कलंकं लांच्छनं बिभर्तीति कलंकभृत् सलांच्छनः, अहर्पतिः सूर्यः तापेन युक्त एव सोष्ण एव उमायाः पार्वत्याः पतिः शंकरश्च अर्धं तनौ शरीरार्धे तन्वी स्त्री यस्य किल ननु विश्वेषु जगत्सु अशेषाः समग्राश्च ते गुणाश्च तान् भजतीति अशेषगुणभाक् समग्रगुणवन्, समभावेन शान्तिभावेन पूर्णं व्याप्तं ते तव समानं तुल्यं यदपरं अन्यत् रूपं नास्ति हि निश्चितं ॥ १२ ॥

ख्यातं क्षितौ तव मतं यदबुद्धिना तज्-ज्ञातं न दोष इह तेऽपि न पश्यतीदम् ।
घूको रवेर्द्युतिमदेव हि मण्डलं न, यद्वासरे भवति पाण्डुपलाशकल्पम् ॥ १३ ॥

ख्यातमिति । क्षितौ भूमौ ख्यातं प्रसिद्धं यत् तव मतं तत् नास्ति बुद्धिर्यस्य तेन मूर्खेण न ज्ञातं न बुद्धं, इह अज्ञाने ते तव दोष अपि दूषणमपि न, हि यस्मात् यदिदं पुरोदृश्यमानं वासरे दिवसे पाण्डुश्चासौ पलाशश्च तेन कल्पं तत् ईषत् पीतवर्णकिंशुकतुल्यं रवेः सूर्यस्य यथेच्छं मण्डलं द्युतिमदेव कान्तिमदेव तथापि घूकः दिवाभीतो न पश्यति तत्र सूर्यस्य किं दूषणं ? किमपि न ॥ १३ ॥

शान्तान्यदेवमवबोधयुतं गुरुं च, धर्म्मं श्रयन्त्यवमतोन्नतशासना ये ।
पुंसो विधूतपरवादविनाभवन्तं, कस्तान्निवारयति सञ्चरतो यथेष्टम् ? ॥ १४ ॥

शान्तेति । हे शान्त ! शान्तिगुणविशिष्ट एवं पूर्वश्लोकोक्त रीत्या अवमतमुन्नतं शासनं यैस्ते तिरस्कृत श्रेष्ठ शासना ये जनाः अव-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बोधेन ज्ञानेन युतं सहितं अन्यद् भिन्नं गुरुं धर्मं च श्रयंत्याश्रयंति । विधूतः—तिरस्कृतः परवादः प्रतिवादिवचनं येन तत्संबुद्धौ, यथेष्टं यथेच्छम् संचरतः प्रवृत्तिमतः वान् पुंसः पुरुषान् भवन्तं विना त्वद्विना कः निवारयति ? को निवारयितुं शक्नोति ? न कोऽपि ॥ १४ ॥

अभ्रा रवेण न जितं भवतः स्वरं तत्, किं भूत(५)वह्नि(३)मित।(३५)गिर्गुणभारपूर्णम् ।
प्रास्तोपतापविषदाहमनेन वाग्भिः, किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥ १५ ॥

अभ्रेति । हे जिन ! अनेन पुरोदृश्यमानेन अभ्रस्य मेघस्यरवो गर्जना तेन भवतः तव तत्प्रसिद्धं स्वरं देशनात्मकगर्जना किं न जितं कुतो न पराजितं। कथं भूतं स्वरं भूतानि चाकाशादि पंचभूतानि, अग्नयश्च गार्हपत्यादि वह्नयस्तेषां मिताश्च परिमिताः गिरां गुणाश्च तेषां भारेण गौरवेण पूर्णं भृतं । पुनः कथं भूतं ? वाग्भिः वाणीरचनाभिः प्रकर्षेणोत्तकर्षेणास्त अस्तं प्रापित उपतापः संसारताप एव विषं हलाहलस्तस्य दाहः दहनं येन तत् । कुतो न जितमित्यत्र जेतुमशक्यत्वात् न जितमित्याह—मन्दरश्चासावद्रिश्च तस्य शिखरं मंदराचलशृंगं, कोटिशतपवनैरपि कदाचित् कस्मिनपि समये चलितं चलायमानं भवति किं? अपि तु न भवति, तर्हि तत्सदृशं पंचत्रिंशत् गुणभारयुक्त भगवत्स्वरं मेघगर्जनया कथं जेतुं शन्कुयात् । यथा वृष्ट्या मेघस्तापं हरति तद्वत् जिनमेघो वाग्वृष्ट्या भवतापं हरतीति भावार्थः ॥ १५ ॥

एकत्र जन्मनि पदे च गते त्वया द्वे, या चक्रवर्तिपदवी खलु सा च मुक्ता ।
इक्ष्वाकु भूपतिषु तीर्थकरोऽत एव, दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६ ॥

एकत्रेति । एकत्र जन्मनि एकस्मिन्जन्मनि च त्वया द्वे पदे पदव्यो गते प्राप्ते। एका चक्रवर्तीपदवी अन्य तीर्थंकरपदवीच। तयोर्मध्ये



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

या चक्रवर्तीपदवी सा च सा तु त्वया मुक्ता त्यक्ता खलु निश्चितं, तदनन्तरं त्वं इक्ष्वाकवश्च ते भूपतयश्च तेषु इक्ष्वाकुकुलरा[illegible]सु तीर्थंकरो भूः । हे नाथ ! नायकात एव तर्थंकर त्वादेव त्वमपरो दीपोऽसि । कथं भूतो दीपो ? जगति त्रिलोके प्रकाशो यस्य सो जगत्प्रकाशः यथा दीपस्तमो विनाशकत्वाद्दीपयतीति दीपस्तद्वत् त्वमपि जगदांध्यविनाशकत्वाद्दीपोऽसीति भावार्थः ॥ १६ ॥

क्षित्यां पदै र्हततमः स्मरणेन शश्वत्, सद्हृत्पयोजमवबोधमुपैत्यरं ते ।
गोपाशनाशकरदर्शन एष चात्र, सूर्यातिशायि महिमासि मुनीन्द्र ! लोके ॥ १७ ॥

क्षित्यामिति । यथा सूर्यकिरणैस्तमो विनश्यति, पयोजं च विकसति तद्वत् ते तव क्षित्यां भूमौ पदैः पादन्यासैः हतं च विनष्टं तस्तमश्च मोहः ते क्षितौ पदन्यासै जगदांध्यं विनष्टं ते शश्वत्सततं स्मरणेन सतां सज्जनानां हृदेव हृदयमेव पयसि जले जातं पयोजं कमलं अरं शीघ्रं तदवबोधं जाग्रति मुपैति प्राप्नोति । इदं तु तव सूर्यसादृश्यं परंतु तव सूर्यातिशायी प्रभावः कथमिति चे[illegible]त्वं हे मुनीनामिन्द्र ! अत्र च लोके जगति गावः मनोप्रभृतींद्रियाणि ता एव पाशः भवबन्धनरज्जुः "[illegible]न एव मनुष्याणां कारणं बंधमोक्षयो[illegible]रिति वचनात्", तस्य नाशकरं मनोप्रभृतीनां संसारात् निवृत्तिकरं दर्शनं प्रत्यक्षं यस्य स एषः [illegible]श्यमानस्त्वं सूर्यादतिशायी भानुमतिक्रमितः महिमा प्रभावो यस्य स एतादृशस्त्वमसि ॥ १८ ॥

आस्यार्णवादिह नदी धृतिपूतवर्त्मा, सङ्ख्येय सा[illegible]गुणरत्नचयाढ्यस्ते ।
उच्छिन्ननाशममृताच्छिशिरं प्रभावे, विद्योतयज्जगदपू[illegible]शशाङ्कबिम्बम् ॥ १८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आस्यति । हे जिन ! इह जगति पूतं पवित्रं वर्त्म मार्गो यया सा पूतवर्त्मा, धृतिश्चासौ पूतवर्त्मा च धृतिपूतवर्त्मा, धृतिर्निर्विकारचित्तत्वं चेतसि विकाररहिते सति प्रवृत्तिरूपो मार्गो निर्दोषो भवति । दूषितप्रवृत्तेः कामादिजन्यत्वात् पवित्रमार्गो धृतिरूपा नदी सरित् नद्यपि पूतमार्गा भवतीयमपि तादृशी ते तवास्यमेवार्णवः मुखमेव समुद्रस्तस्मात् जाताऽत एवाऽपूर्वा नदी नद्यस्तु पर्वतेभ्यो जायन्ते, समुद्रे प्रविशन्ति न तु समुद्रात् जननं, इयं तु समुद्रजाताऽतो नूतना यथा समुद्र असंख्यरत्नविशिष्टो भवति, मुखसमुद्रोऽपि तत्सदृश इत्याह—कथंभूतात् आस्यार्णवात्, असंख्येया अपरिमिताश्च ते सारगुणाः श्रेष्ठगुणाश्च त एव रत्नानि तेषां चयः समूहो यस्मिन् स तस्मात् चापूर्वं नूतनं च तत् शशांकस्य चन्द्रस्य बिम्बम् च तत् तव मुखसमुद्राज्जातं, कथं भूतं ? जगल्लोके विशेषेण द्योतयति प्रकाशयतीति जगत्प्रकाशकं लोकाज्ञाननाशकत्वात्, चन्द्रोऽपि तिमिरं विनाश्य प्रकाशयति प्रकर्षेण भावा धर्माः शान्त्यादयस्तैः शिशिरं शीतलं शान्त्यादिबोधकत्वात् । पुनः कथंभूतं चंद्रबिंबमपि शैत्यादि गुणैः—शीतलं । अमृतात् ज्ञानामृतात् उच्छिनो नाशो येन तत् प्रकर्षेण छेदितमरणं वचनजन्यज्ञानेन जन्ममरणाभावात्, चन्द्रबिम्बमपि सुधया मरणं वारयति ॥ १८ ॥

वाङ्नीरदैः प्रशमिताः सदशेषजीवाः, प्रक्षालितार्त्तिमलराशिभिरेव सन्ति ।
नाथ ? प्रफुल्लवृषकल्पनगैस्तु ते तत्, कार्यं कियज्जलधरैर्जलभारनम्रैः ॥ १९ ॥

वाङ्नीरदैरिति । हे नाथ ! स्वामिन् ! ते तव वाचो वचनान्येव नीरं जलं ददतीति नीरदास्तै र्वचनमेघैरेव सन्तो भव्याश्च ते अशेषाः समग्राश्च ते जीवाः जन्तवश्च ते प्रकर्षेण शमिताः शान्तिं प्रापिताः सन्ति, वारिदा अपि सत्समग्रजीवान् शान्तिदा भवन्ति । कथंभूतै र्वाङ्नीरदैः ? आर्त्तयः पीडाश्च मलानां पापानां राशयः समूहाश्च प्रक्षालिता धौता आर्तिमलराशयो यैस्ते, तैर्मेघा अपि धौतग्रीष्मपीडा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पङ्कपटला भवन्ति । तु पुनः कथं भूतैः प्रफुल्लाः वृषाः धर्मा एव कल्पसंज्ञता, न गच्छतीति नगाः वृक्षाः यैस्ते तैर्नोरशा अपि विकसितधर्मसद्वृक्षकल्पवृक्षा भवन्ति । तत्तस्मात् जलदकार्यं तव वचनमेघैरेव करणात् जलानां भारैः नम्रास्तैर्जलधरैर्मेघैः कियत्कार्यं किं कार्यं ? किमपि कार्यं नास्ति, निष्फलत्वं प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वत । अत्र वाङ्मेघैर्मेघकार्यकरणात् मेघनिष्फलत्वप्रदर्शनात् प्रतीपालंकारः ॥१९॥

प्रीतिर्यथा त्वदुदिते समये मुनीनां, कस्मिंस्तथा न गतराग ! विरोधवाचि ।
ज्योत्स्नाप्रियस्य विधुरोचिषि मुद्यथास्ति, नैवं तु काचशकले किरणाकुलेऽपि ॥ २० ॥

प्रीतिरिति । गतः विनष्टः राग प्रीतिर्यस्य तत्संबुद्धौ हे गतस्नेह ! त्वयोदितः कथितस्तस्मिन्समये शास्त्रे मुनीनां यथा प्रीतिस्तथा विरोधाः विरोधवत्यः वाचो वाण्यो यस्मिन् तस्मिन्कस्मिनपि समये प्रीतिर्न जोत्स्ना चन्द्रिका प्रिया प्रीतिविषया यस्य तस्य चकोरपक्षिणः पुरुषस्य वा विधोश्चन्द्रस्य रोचिः कान्ति स्तस्मिन्यथा मुद् प्रीति अस्ति । एवं तु एवं प्रकारेण किरणैः आकुलेऽपि व्याप्तेऽपि काचस्य शकले खण्डे मुद् न ॥ २० ॥

आरोपितं समयपर्वतसानुदर्यां, हृद्यैस्तवोच्चलितचित्तजचित्रकायाम् ।
सम्भाव्य तद्विषयतस्करकान्न तेषां, कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१ ॥

आरोपितमिति । हे नाथ ! तस्य मनसः विषयाः दयासम्यक्त्वादयः, तेषां तस्करकान् चोरान् संभाव्य विचार्य यैः हृद्यैः सुंदरैः जनैः उत् अत्यन्तं चलितानि कम्पितानि चित्तात् जातः चित्तजः तस्य मदनस्य चित्रकाणि हावभावकटाक्षादीनि यस्यां तस्यां तव समयः शास्त्र एव पर्वतः तस्य सानु शिखरं तास्मिन्गिरिगुहा तस्यां मनः आरोपितं स्थापितं तेषां मनः अन्योभवः जन्म भवान्तरं तस्मिन् जन्मां-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तरेऽपि कश्चित् चार्वाकादिः न हरति। हर्तुं न शक्नोति । लोकेऽपि सुवर्णरत्नादिद्रव्यमंजुषा चौरभयाद्गुप्तस्थाने स्थापिता तां चौराः हर्तुं न शक्नुवन्ति, तद्वदेव दयासम्यक्त्वादिरत्नपूर्णा ममोमयमंजुषा भव्यैः तव शास्त्रपर्वतशिखरगुहायां गुप्तस्थाने स्थापिता तां चार्वाकादिकोऽपि तस्करोऽस्मिन् जन्मनि न हरित । अत्र किमुवक्तव्यं, भवान्तरेऽपि न हरत्ययं भवार्थः ॥ २१ ॥

चैतन्यमाप्तविदुषां निजकं व्यनक्ति, त्वद्वाग् वृषांचितपदी चिरकालनष्टम् ।
मीनाकरस्य निशि नन्दधिया सुधांशुं, प्राच्येव दिग्जनयति स्फुरदंशुजालम् ॥ २२ ॥

चैतन्यमिति । वृषेण धर्मेणांचितानि पूजितानि पदानि सुविर्गतानि यस्यां सा तव वाक् तव वाणी चिरकालेन बहुकालेन नष्टं विध्वस्तं निजकं स्वकीयं चैतन्यं ज्ञानं, आप्ता यथार्थवक्तारश्च ते विद्वान्सश्च विबुधाश्च तेषां व्यनक्ति प्रगटयति, काकमिव प्राचीदिक् पूर्वदिक् निशि रात्रौ स्फुरत् दीप्यमानं अंशुनां किरणानां जालं समूहो यस्य तं । मीनानां मत्स्यनां आकरः खनिः तस्य समुद्रस्य नंदस्य पुत्रस्य धीः बुद्धिः तथा सुधाः अमृतमयाः अंशवः किरणाः यस्य तं चन्द्रं जनयतीव यथोत्पादयति, तथा पूर्वदिक् जलनिधिपुत्रबुध्याचन्द्रमुत्पादयति तद्वदेव आप्ता विबुधसुतधिया त्वद् वाणी चैतन्यं जनयति, प्राचीदिगेव जलनिधिसुतं चन्द्रं जनयति तद्वत्त्वद्वागेवाप्तविबुधानामात्मस्वरूपज्ञानात्मकं चैतन्यं जनयति । नान्येषां वाणीनां सामर्थ्यमिति, वा एवकार करणे दृष्टांतालङ्कार इव करण उपमालङ्कार इत्यर्थः ॥२२॥

सिद्धान्तवर्त्मनि पलायितदुर्मनीष–दस्यौ तवा गुरमृतं ननुयन्ति भूत्वा ।
घृष्यन्ति ये स्वगुणभारभृता हि नाथ ! नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥ २३ ॥



For Private And Personal Use Only

सिद्धान्तेति । स्वस्यात्मन गुणा सम्यक्त्वशान्त्वादयस्तेषां भारेण गुरुत्वेन भृताः पूर्णा ये जना यति भूत्वा पलायिताः विनष्टा दुष्टा नीचा मनीषा बुद्धि र्येषां ते दुर्मनीषाश्च दस्यवश्च तस्करा अस्मिन् स तस्मिन् तत्र सिद्धान्तस्य प्रमाणनिर्णितपदार्थस्य वर्त्मा मार्ग स्तस्मिन् एष्यन्ति आगच्छन्ति । हे नाथ ! ते ननु ते एव अमृतं मोक्षं अगुः प्रापुः, किं यस्मात् मुनीन्द्र! यतीन्द्र ! शिवः सुखकारकः शिवपदस्य मोक्षपदस्यान्यः भिन्नः पन्थाः पदवी नास्ति ॥ २३ ॥

आराध्यशासनमपास्तकुशासनं ते, ये ज्ञानिनः स्युरति विस्मय एष नार्हत् ।
अन्येभ्य एकमिदमेव पृथग्विधाय, ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २४ ॥

आराध्येति । हेऽर्हन् जिन ! अपास्तं कुशासनं येन तत् त्यक्तदर्भासनं ते तव शासनं शास्त्रमाराध्याराधयित्वा ये पुरुषा ज्ञानिनः केवलज्ञानवन्तः स्युरपि भवन्त्यपि एषः विस्मय आश्चर्यं न, यत एकमद्वितीयमिदमेव तव शासनमेवान्येभ्योऽन्यशास्त्रेभ्यः पृथग् विधाय पृथक् कृत्वा सन्तः साधवः अमलं निर्मलं ज्ञानस्य स्वरूपं प्रवदन्ति कथयन्ति, तव शासनस्य ज्ञानस्वरूपत्वात् ज्ञानराधनेन ज्ञानिनो भवन्त्यत्राश्चर्यं कथमिति भावः ॥ २४ ॥

त्वां सेवते दिननिशं निजकेवलश्रीः, प्रक्षीणमोहदनुजं ससुदर्शनं सा ।
अध्यासितोपशमसागरमध्यमस्मा–द्व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥ २५ ॥

त्वामिति । हे भगवन् ! भगमणिमाद्यैश्वर्यमस्यास्तीति भगवान् तत्संबुद्धौ हे भगवन् ! अस्मात् हेतोस्त्वमेव व्यक्तं स्पष्टं पुरुषोत्त-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोऽसि । पुरुषेषु नरेषु उत्तम श्रेष्ठः, सा प्रसिद्धा निजा स्वकीया चासौ केवलस्य केवलज्ञानस्य श्रीः लक्ष्मीः, त्वां दिनं च निशं च दिननिशं दिवारात्रौ सेवते, पुरुषोत्तमस्य विष्णोरपि श्रीः दिवारात्रौ सेवते । कीदृशं त्वां ? प्रक्षीणः विनष्टः मोहो अज्ञानमेव दनुजो दैत्यो यस्मात्तं, विष्णुरपि विनाशितदैत्यः । पुनः कीदृशं ? सुष्ठु सम्यक् दर्शनं सर्वजगत्प्रत्यक्षं तेन सहितं स सुदर्शनं, विष्णुरपि सुदर्शनचक्र सहितः । पुनः कथं भूतं ? अध्यासितः उपशमः शान्तिरेव सागरः समुद्रो येन तं विष्णुरपि समुद्रमध्ये तिष्ठति, उक्त पुरुषात्तमविशेषणैर्हेतुभिस्त्वमेव नरश्रेष्ठ इति भावः ॥ २५ ॥

देवाः परे स्वमपि तारयितुं न हीशा, आत्मश्रितान्कथमिमे तु भवेयुरत्र ।
नत्यादि तेषु च वृथा श्रितवैभवाय, तुभ्यं, नमो जिन ! भवोदधिशोषणाय ॥ २६ ॥

देवा इति । परे अन्ये देवाः सुराः स्वमपि स्वात्मानमपि तारयितुमुद्धर्तुं नेशाः न समर्थाः हि निश्चितं, तु पुनः, इमे देवाः आत्मानं स्वं श्रिता आश्रितास्तानत्र तारणे समर्थाः कथं स्यु ? । यः स्वात्मानं न तारयति स अन्यं कथं तारयेत् ? अतः कारणात् तेषु च देवेषु नति मनदिर्यमिन् नन्नत्यादि वृथा विफलं । हे जिन ! श्रितानां आश्रितानां वैभवः संपद् यस्मात्तस्मै श्रितवैभवाय भवः संसार एवोदधिः सागरस्तं शोपयतीति विनाशयति यस्मै तुभ्यं नमोऽस्तु ॥ २६ ॥

ये त्वां विमुच्य परकीयविभून् भजन्त्य–विज्ञाततत्त्वमधुरैर्वरतत्त्वकीर्णैः ।
नाम्ना प्रशान्तभवपापजसाध्वसस्तैः, स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ये इति । ये जनाः त्वां विमुच्य त्यक्त्वा परकीयाश्च अन्याश्च तं विभवश्च समर्थाश्च तान् भजन्ति सेवन्ते, तत्त्वस्य सारस्य मधुरं माधुर्यं अविज्ञातं न ज्ञातं तत्त्वमधुरं यैस्ते तैरविज्ञाततत्त्वमधुरैः वरं श्रेष्ठं च तत्त्वं च सारश्च तेन कीर्णः व्याप्तः नाम्ना नामसंकीर्तनात्, प्रशान्तः शान्तिं प्रापितः भवीनां संसारीणां पापाज्जातः पापजः सचासौ साध्वसश्च भयं च पापजसाध्वसः, येन स त्वं तैः स्वप्नस्यान्तरं स्वप्नान्तरं तस्मिन् स्वप्नमध्येऽपि कदाचिदपि कस्मिन्समयेऽपि नेक्षितोऽसि नावलोकितोऽसि ॥ २७ ॥

दुर्भव्यविग्रहिवपुर्ज्वलतीह नाथा-भ्यासे कथं तव चितामृतसारशीते ! ।
ज्ञातो मयाऽस्य सहजो न भवेत्किमुष्णं, बिम्बं रवेरिव पयोधरपार्श्ववर्त्ति ॥ २८ ॥

दुर्भवीति । हे नाथ ! स्वामिन् ! चितः व्याप्त श्चासौ अमृतस्य सुधायाः सारश्च तत्त्वं च तेन शीतं शीतलं तस्मिन्, इहात्र तवाभ्यासे समीपे नास्ति विशेषेण भेदेन ग्रहः सदसद्विवेकात्मकज्ञानं येन तदविग्रहि वपुः शरीरं यस्य सः सदसद्विवेकशून्यशरीरी, दुष्टः अनन्तसंसारसंपादकः भवः जन्मः यस्य सः दोषवत्वं दुष्टत्वं दोषस्त्वत्रानन्तभवसंपादकत्वं, दुर्भवी दुराग्रही, कथं ज्वलति प्रज्वलितः कथं भवति ? शीते तव समीपे शीतेन भवितव्यं उष्णः कथं भवति मयोष्णं अस्य दुर्भविणः सहजातः सहजः स्वभाविको धर्मो ज्ञातः तन्न भवेत् किं ? अपि तु भवेदेव । पयांसि जलानि धरति वहतीति पयोधरस्य मेघस्य पार्श्वे समीपे वर्तत इति पयोधरपार्श्ववर्ति मेघसमीपवर्ती, रवेः सूर्यस्य बिम्बमिव मण्डलमिव यथा जलपूर्णमेघसमीपवर्ति सूर्यबिम्बेन शीतलेन भवितव्यं तथापि स्वभावादुष्णमेव न तु शीतं भवति तद्वदेव सुधा व्याप्त तव स्वभावो दुर्लंघ्य इति भावः ॥ २८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्तोऽन्यवादिनिचयो हि दवीयसोऽपि, भीत्वा प्रणश्यति निरीहविदर्प्पसिंहात् ।
अश्वेततावनितलाग्रतमोभरस्तु, तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९ ॥

त्वत्त इति । निर्गता ईहा तृष्णा यस्मात्सो निरीहः वितृष्णाश्चासौ विगतो निर्गतो दर्पोऽहंकारो यस्मात्सो विदर्पश्चासौ सिंहश्च निरीहविदर्पसिंहस्तस्मात् सिंहसदृशपराक्रमवत्वात् सिंह इति व्यवहारः । त्वत्तः त्वत्सकाशात् कथं भूता त्वत्तः दूरे तिष्ठतीति ? दवीयान्तस्माद्दवीयसः, दूरे वर्तमानादपि अन्ये परे च ते वादिनो वादकर्त्तारश्च तेषां निचयः समूहः भीत्वा भयं प्राप्य, हि निश्चितं प्रणश्यति, विनश्यति, कस्मात्क इव तुंग उन्नतश्चासौ उदयस्याद्रिः पर्वतश्च तस्य शिरसि वर्तमानात् सहस्रं रश्मय किरणा यस्य तस्मात् सूर्यात् अश्वेतता श्याम्यता रूपश्चासौ अवन्याः भुवस्तला ये तमसां तमिस्राणां भरः समूह इव । यथा भानो ध्वान्तं विनश्यति, तथा त्वत्तः वादिनः प्रणश्यन्तीति भावः । तु पादपूरणार्थं ॥ २९ ॥

अंघ्रिद्वयं सुरवरा अवमन्य नाकं, संसार कृच्छ्रभिदुरं निवसन्ति नित्यम् ।
नानांघ्रिपीटसुमनोरचिताग्रभाग-मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३० ॥

अंघ्रिद्वयमिति । सुरेषु देवेषु वराः श्रेष्ठाः नाकं स्वर्गं अवमन्य तिरस्कृत्य संसारस्य कृच्छ्रं कष्टं भिनत्तीति भिदुरं भेदकं तत् नाना अनेका अंघ्रयो पादाः यस्य तत् नानांघ्रि च तत्पीठं च पादासनं च तस्मिन्सुमनोभिः पुष्पैः रचितः भंगियुक्त कृतः अग्रभाग पूर्वदेशो यस्य तत् ते अंघ्रिद्वयं उन्नतं सुरगिरेः सुवर्णाचलस्य तटमिव निवसन्ति वासं कुर्वन्ति ॥ ३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**आप्त्वापचेतनमहो ! प्रसवीयवृन्दं, त्वां स्मेरतां लभत एव कथं विहस्य ? ।**
**पत्रैः परश्रियमतीव विभो ! त्वदीयं, प्रख्यापयत्रिजगतः परमेश्वरत्वम् ॥ ३१ ॥**

आप्त्वेति । अहो ! आश्चर्यं ! अपगतं चैतन्यं यस्मात्तदपचेतनं चैतन्यररितं प्रसवाणां पुष्पाणामिदं प्रसवीयं च तद्वृन्दं च पटलं च तं मेवाप्त्वा प्राप्त्वा पत्रैः विहस्य हासं कृत्वा कथं कस्मात्कारणात्स्मेरतां विकसतां लभते प्राप्नोति ?। अचेतनस्य त्वद् प्राप्त्यैव एवकारेणान्य प्राप्त्यो नेति सूचनं, चेतनधर्महास्यवद्धा संभवित संभवनमाश्चर्यं, कथं भूतं प्रसवीयवृन्दं विभो समर्थातीवात्यन्तं परा श्रेष्ठा श्रीर्यस्य तत्तत् अनतिशयितसमृद्धिमत् तवेदं त्वदीयं त्वत्संबन्धि, त्रयाणां जगतां लोकानां समाहारस्त्रिजगत् तस्य त्रिलोकस्य इष्टेऽसौ ईश्वरः य इष्टे कार्यकरणे समर्थो भवति स ईश्वरः, परमश्चासौ इश्वरश्च परमेश्वरस्तस्य भावः परमेश्वरत्वं तत् असंभवितवस्तुकरणसामर्थ्यं परमेश्वरत्वं, प्रख्यापयति प्रसिद्धिं नयतीति प्रख्यापयत् परमसामर्थ्यमन्तराऽचेतनस्य चेतनधर्मवत्त्वं कथं स्यात् ? चेतनधर्महास्यं धारयन् त्वदीयमनुपमसामर्थ्यं सूचयतीति भावः ॥ ३१ ॥

**सम्भाव्य भद्र ! भवदीयगुणान् श्रितास्त्वा–मर्च्या भवेयुरपि नैतदसत्यमत्र ।**
**यत्ते क्रमौ श्रयति पीठमतिप्रणिम्नं, पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२ ॥**

सम्भाव्येति । हे भद्र ! श्रेष्ठः ! भवत इमे भवदीयाश्च ते गुणाश्च तान् सम्भाव्य ज्ञात्वा, ये जनास्त्वामाश्रितास्ते अर्चितुं योग्या अर्च्याः पूज्या अपि, अत्र लोके भवेयुः स्युः, एतदसत्यं न त्वदाश्रिता जगति पूज्या भवन्ति एतन्मिथ्या न, कुतस्ते तव क्रमौ पादौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्पीठं पादस्थानं श्रयत्याश्रति तत्पीठमपि अतिशयेन प्रणमितुं योग्यं अतिप्रणिम्नं अति नमस्कार्यं भवति, यतो विबुधा देवाः तत्र पादपीठे पद्मानि कमलानि परिकल्पयन्ति रचयन्ति, त्वदाश्रितंपादपीठमपि पूज्यं भवति, तर्हि जनाः पूजार्हा भवेयुरत्र किं वक्तव्यमिति भावः॥३२॥

सालोकलोकमणिहारसुनायकस्य, यादृक् प्रताप इह दीव्यति ते सखेलम् ।
ध्मातान्यशास्त्रमद! सोष्णकरस्य ताप–स्तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ॥ ३३ ॥

सालोकेति । ध्मातः तिरस्कृतः अन्यशास्त्राणां मदो येन तत्संबुद्धौ हे ध्मातान्यशास्त्रमद ! तिरस्कृतान्यशास्त्राभिमानालोकेन प्रकाशेन सहिताः सालोकाः च ते लोकानां त्रिजगतां मणयश्च तेषां हारो यस्य स चासौ सुष्ठु सुन्दरो नायकः स्वामी सुनायकश्च तस्य ते तव प्रतापः पराक्रमः खेलेन सहितं क्रीडाव्यापारेण सहितं यथास्यात्तथा, यादृक् यादृशः इह जगति दीव्यति क्रीडति, तथाऽन्येषां प्रतापः कुतः ? नैवक्रीडति, उष्णेनोष्णस्पर्शेन सहिता कराः किरणा यस्य सूर्यस्य तापः यादृक् भवति तादृक् ग्रहाणां चन्द्रादीनां गणः समूहस्तस्य, विकसते इति विकाशि तस्य प्रकाशिनोऽपि तापः कुतः ? नैव भवेत् ॥ ३३ ॥

साटोपकोपशितिरोप निरोधकारं, मोहप्रवेशपिहितारसिन्निभं ते ।
दिव्यं कुतश्च न यथार्थतया स्वरूपं, द्रष्ट्वा भयं भवति नो भवदाश्रितानां ॥ ३४ ॥

साटोपेति । आटोपेन सहितः साटोप आडम्बरसहितश्चासौ कोपश्च क्रोधः, स एव शितिरोपस्तीक्ष्णबाणस्तस्य निरोधं प्रतिबन्धं करोतीति निरोधकारं तत्, अररिचं कपाटं तेन सन्निभं सदृशं तत्, ते तव दिव्यमलौकिकं स्वरूपं, अर्थमनतिक्रम्य वर्तते यथार्थं तस्य भाव



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथार्थं तस्य भावः यथार्थता तया यादृशं स्वरूपं तादृशं द्दृष्ट्वा भवत आश्रितानां नः अस्माकं कुतश्च कुत अपि भयं भीतिर्न भवति ॥ ३४ ॥

**कन्दर्पसर्प्पपतिदाहसुपर्णरूप–नष्टज्वलत्स्मयहुताशनलोलुपाऽपि ।**
**तृण्निम्नगा स्वयमतीर्य्यमिषाम्बुपङ्का, नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३५ ॥**

कंदर्पेति । कन्दर्पः मदनः स एव सर्पाणां पतिस्तस्य दाहे नाशे सुपर्णरूपः गरुडरूपः नष्टः नाशंप्राप्तः ज्वलन् प्रज्वलन् स्मयो दर्प एव हुताशनो वह्नि यस्मात् तत्संबुद्धौ, तृट् तृष्णा एव निम्नं नतप्रदेशं गच्छतीति निम्नगा नदी, कथं भूता ततुं योग्यं तीर्य्यं च कपटं तदेवाम्बुपङ्कौ जलकर्दमौ यस्यां पुनः कथं लोलुपापि आक्रमणं लोभवत्यपि ते तव क्रमयोः पादयोः युगं युग्मं तदेवाचलः पर्वतः तस्मिन् संश्रितं आश्रितं जनं स्वयमात्मना नाक्रामति नाधितिष्ठति ॥ ३५ ॥

**दिश्येत मुक्तिरिति वा न हि सेवयाऽस्य. मिथ्याविमर्शनमदोऽस्ति मदोज्झितस्य ।**
**संसारदुःखनिचितं यदि पापतापं, त्वन्नामकीर्त्तनजलं शमयत्यशेषम् ॥ ३६ ॥**

दिश्येतेति । यदि तव नामाभिधानं तस्य कीर्तनं तदेवजलं तत् संसारस्य दुःखं निचितं संपादितं येन स तं पापस्य तापः अग्निस्तं नास्ति शेषः यस्य तं समग्रं शमयति नाशयति, तर्हि मदः उज्जितस्त्यक्तो येन तस्यास्य शान्तिनाथस्य सेवया मुक्तिः दिश्येत प्राप्येतेति विमर्शनं विचारः अदः वा इदमपि मिथ्या नास्ति, हि निश्चितं कर्मणां भवदातृत्वं तेषां समूलं तव नामकीर्तनात् नाशे मुक्तिरेवावशेषिता इति भावः ॥ ३६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



फुत्कार निर्गतगरप्रसरद्दवाग्नि–धूम्रीकृतत्रिजगतीजनसद्गुणौघः ।
दंदश्यते जिन ! न तं स्मयदन्दशूक–स्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥ ३७ ॥

फुत्कारेति । हे जिन ! फुत्कारेण फुत्करणेन निर्गतश्चासौ गरश्च विषं तेन प्रसरं श्चासौ दवाग्निश्च वनाग्नि स्तेन धूम्रीकृताः त्रिजगत्या त्रिलोकस्य जनस्तेषां सद्गुणानामोघाः समूहा येन, स्मय एव दंदशूकः दर्पसर्पः यस्य पुंसः नरस्य हृदि मनसि तव नाम, तदेव नागं सर्पं दमयति निस्तेजस्कं करोतीति नागदमन्यौषधिरस्ति तं न दंदश्यते न दशति ॥ ३७ ॥

निर्दस्युमित्र ! भुवि यद्यसि वीतराग–स्त्वद्रागिणां कथमनन्तभवोद्भवाकम् ।
आदित्यतः किमु ननु त्वदवाङ्मुखानां, त्वत्कीर्त्तनात्तम इवाशु भिदामुपैति ॥ ३८ ॥

निर्दस्युमित्रेति । निर्गताः दस्यवः कामक्रोधादि चौराः यस्मात् अत एव मित्र इव सूर्य इव, चौरा हि वस्तुहरणं कुर्वन्ति कामादयोऽपि आत्मस्वरूपवस्तुहरा इति चौराः, तमोऽपि वस्तुदर्शनहरमत श्चोररूपं तत्, यथा सूर्यात्पलायति तद्वत् कामादयास्तीर्थेश्वरात् पलायन्ते इति सूर्यसादृश्यं, अथवा निर्दस्यूनां निर्गतकामादीनां मित्रं सुहृत्तत्संबुद्धौ निर्दस्युमित्र ! भुवि भूमौ विगतः रागः स्नेहो यस्य सत्वं यद्यसि ? तर्हि त्वयि रागो येषां तेषां त्वद् रागीणां अनन्ताश्च ते भवाश्च तेभ्यः उद्भवं च जातं तदकं च दुःखं तत् कथं भवेत् ? नैव भवेत् । नु वितर्के, त्वयि अवाक् नम्रं मुखं येषां तेषां तव रागीणां तव कीर्तनात् स्मरणात् आदित्यतः सूर्यात् इव तमः अज्ञानं भिदां भेदं नोपैति किं ? अपि तूपैति ॥ ३८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संतप्तदीप्ततपनीयमनोज्ञमूर्ते ! प्रोद्गच्छदूर्मिचलभावविनाशरूपम् ।
सद्ध्यानगन्धमिह कोविदचञ्चरीका-स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ३९ ॥

संतप्तेति । संतप्तं च तत् दीप्ततपनीयं च अग्नितप्तदेदीप्यमानसुवर्णं तद्वत् मनोज्ञा सुन्दरा मूर्तिर्यस्य तत्संबुद्धौ प्रकर्षेणोद्गच्छन्त्यश्च ता ऊर्मयश्च प्रोच्छलत्तरंगास्ता इव चलाश्च ते भावाश्च मनोविकारास्तेषां विनाशो विध्वंसः, रूपं स्वरूपं यस्य तं इह जगति तव पादावेव पङ्कजानां कमलनां वनं तदाश्रयिणः तदाश्रयकर्तारः कोविदाश्च विद्वांसस्ते चञ्चरीकाश्च भ्रमराः ते सच्च तत् ध्यानं तस्य गन्धं सुगन्धं लभन्ते प्राप्नुवन्ति ॥ ३९ ॥

माहात्म्यमत्र तव कैरपि चिन्तनीयं, तद्ध्येयगात्रतपसोऽसुकराज्ञ केचित् ।
अन्तं जनुर्निधनयोर्गहनेऽपि भूय-स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४० ॥

माहात्म्यमिति । अत्र जगति कैरपि जनैस्तव तत्प्रसिद्धं महानात्मा यस्य तस्य भावः माहात्म्यं सामर्थ्यं चिन्तितुं योग्यं चिन्तनीयं मनोविषयीकरणयोग्यं न भवति, माहात्म्यस्यापारत्वात् । तर्हि माहात्म्यचिन्तनेन केऽपि मोक्षं मन्तुं न शक्नुवन्ति । ध्यातुं योग्यं ध्येयं तत् गच्छतीति ध्येयगस्तत्संबुद्धौ हे ध्येयग ! माप्तात्मस्वरूप ! अत्र संसारे केचिज्जनाः नसुकरमसुकरं तस्मादसुकरात् दुष्करात् तपसस्तपश्चरणात् मुक्तिं गच्छन्ति, गहनेऽपि दुर्भेद्येऽपि भवे भूयः बहवो जनाः भवतः स्मरणात् जनुश्च जन्म च निधनं च नाशश्च जनुनिधन एतयोः जनुनिधनयोस्त्रासं दुःखं विहाय त्यक्त्वाऽन्तं मोक्षं व्रजन्ति गच्छन्ति ॥ ४० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यैरापि ते विशदधर्मतटाकतीर–मुत्फुल्लबोधकमलं शुचिहंसतुल्यैः ।
तेऽसारभोगपरिखां न तु भोक्तुमीशा, मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४१ ॥

यैरिति । शुचयश्च निर्मलाश्च ते हंसाश्च तैस्तुल्यैः सदृशैः यैः जनैः उत्फुल्लानि विकसितानि बोध एव कमलानि यस्मिन् तत् ते तव विशदो निर्मलश्चः सौ धर्मश्च तस्य तटाकं सरस्तस्य तीरं आपि प्रापि, मकरध्वजेन कामेन तुल्यं रूपं येषां ते मर्त्याः मनुष्या तु पुनः, असारा साररहिता चासौ भोगानांपरिखा च तां नगर परितो जलमयी लोके 'खाई' इति व्यवह्रियमाणा परिखोच्यते तां भोक्तुं नेशाः समर्थाः न भवन्ति ॥ ४१ ॥

स्वर्नर्म्मशर्मपरिभोगविपाकरूपो, धर्म्मोऽस्ति योऽमितसुखाकर आपदस्तः ।
तं प्राप्य कर्मनरराजसितात्मनोऽपि, सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४२ ॥

स्वरिति । स्वरः स्वर्गस्य नर्म्म च क्रीडा शर्म्म च सुखं परिभोगाश्च नानासुखविलासाः तेषां विपाकः परिपक्वता प्राप्तिरूपा रूपं स्वरूपं यस्य, आपदः विपदः अस्ता अस्तं प्राप्ता, यस्मात् अमितं निरूपमं च तत्सुखं च तस्याकरः खनिः, एतादृशः यः धर्म्मः अस्ति तं प्राप्य कर्माणि न राजसितानि न क्षपितानि येषां ते च ते आत्मानश्च कर्मनरराजसितात्मनोऽपि बद्धात्मनो बद्धात्मनोऽपि सद्यस्तत्क्षणं स्वयं स्वतः विगतं बन्धस्य भयं येषां विगतबन्धभयाः, संसारभीतिरहिता भवन्ति ॥ ४२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वर्गस्य भोग इह हस्त इवास्ति तस्य, भूयिष्ठ पुण्यकणकीलितजीवितस्य ।
कैवल्यनिर्वृतिवदान्यसमं प्रशस्तं, यस्तावकं स्तवमिमं मतिमानधीते ॥ ४३ ॥

स्वर्गस्येति । मतिर्बुद्धिरस्ति यस्य मतिमान् यः कैवलस्य मोक्षस्य निर्वृत्तिः सुखं तस्य वदान्यो दाता तेन समं तुल्यं प्रशस्तं श्रेष्ठं तावकं त्वदीयमिमं स्तवं स्तोत्र मधीते पठति भूयिष्ठं च तत्पुण्यं च बहुपुण्यं च तस्य कणास्तैः कीलितं व्याप्तं जीवितं यस्य तस्य पुरुषस्येह लोके स्वर्गस्य भोगो हस्तस्थ इवास्ति ॥ ४३ ॥

उद्यन्ति चित्त सरसि स्तवतोयजानि, शान्तेर्जिनस्य करुणाच्छजलौघभाञ्जि ।
नूर्यस्य सच्छतदलप्रमुखासनस्था, तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥ ४४ ॥

उद्यन्तीति । यस्य नु मनुष्यस्य चित्तमेव सरस्तस्मिन् मनःसरोवरे शान्तेर्जिनस्य स्तवान्येव तोयजानि स्तोत्रकमलानि उद्यन्ति उदयं प्राप्नुवन्ति । कथं भूतानि तोयजानि ? शान्तिजिनस्य करुणा कृपैवाऽच्छो निर्मलो जलौघो जलसमुदायस्तं भजन्तीनि, मानेनादरेण तुंग मुन्नतं तं जनं सन्ति विद्यमानानि शतदलानि शतपत्राणि यस्मिन्तत्कमलं प्रमुखं प्रधानमासनं यस्याः, न वशाऽवशा कस्यापि नाधिना लक्ष्मीः समुपैति सम्यक् प्राप्नोति ॥ ४४ ॥

श्रीकीर्त्तिनिर्मलगुरोश्चरणप्रसादा—द्भक्तामरस्तवनपादतुरीयमाप्त्वा ।
पादत्रयेण रचितं स्तवनं नवीनं, लक्ष्मीसितेन मुनिना विमलस्य शान्तेः ॥ ४५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीकीर्तिरिति । श्री कीर्तिश्चासौ निर्मलगुरुश्च तस्य श्रीकीर्तिविमलगुरोश्चरणयोः पादयोः प्रसादस्तस्मात् पादकृपातो भक्तामरस्तवनस्य पादतुरीयं चतुर्थपादमाप्त्वा गृहीत्वा पादानां त्रयं तेन नूतन पादत्रयमेलनेन लक्ष्मीसितेनमुनिना लक्ष्मीविमलमुनिना विमलस्य निर्मलस्य शान्तेः शान्तिनाथस्य नवीनं नूतनं स्तवनं स्तोत्रं रचितं कृतं ॥ ४९ ॥

॥ इति श्रीशान्तिनाथस्तवनं समाप्तं ॥

॥ इति श्रीमत्पण्डितकीर्तिविमलगणिशिष्यपण्डितलक्ष्मीविमलगणिरचितं श्रीभक्तामरस्तोत्रचतुर्थपादपूर्त्तिरूपं श्रीशान्तिनाथस्तवनं समाप्तम् ॥

॥ अथ श्रीमत्तपागच्छाचार्यश्रीज्ञानविमलसूरिविरचितम् ॥

## ॥ साधारणजिनस्तोत्रम् ॥

श्री गणेशाय नमः

सर्वज्ञा जगतामंबा, मयूरवर वाहिनी । वाग्देवी सरसां वाणीं, तनुतां मे शुभावहं ॥ १ ॥

मंगलरूपां स्तुतिमेवारभते । तेन न मंगलान्तरापेक्षा । इष्टानिष्टेति सुखजनक इष्टपदार्थः दुःखजनकस्तद् विपरीतः, इष्टानिष्टयोः परिहारप्राप्त्योः कारिणी इष्टनाशानिष्टप्राप्तिपरिहारिणीत्यर्थः । कल्याणं सुखं मोक्षश्च तयोः संपादयित्री चिन्ता मनोव्याधिः शोककुत्सितयोगरोगादीनां विनाशीनी मनुष्यानन्ददात्री सदा जनेच्छितवस्तुदात्री कल्पवृक्षसदृशी वाञ्छितार्थसम्पादकत्वात् सत्यवचनाद्धारिणीमूर्तिः निरुपमं सुखं करोतु. इति प्रतिपादनाय स्तौति.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ शार्दूलविक्रिडितवृत्तम् ॥

इष्टानिष्टवियोगयोगहरिणी कल्याणनिष्पादिनी, चिन्ताशोककुयोगरोगशमिनी मूर्त्तिर्जनानन्दिनी।
नित्यं मानववाञ्छितार्थकरिणी मन्दारसंवादिनी, कल्याणं विदधातु सुन्दरतरं सत्यं वचोवादिनी ॥ १ ॥

मूर्तिः सुन्दरतरं कल्याणं विदधातु इति सम्बन्धः । अत्र मूर्तिशब्देन अष्टप्रातिहार्यविशिष्टतीर्थंकरस्वरूपा ग्राह्या । अन्यासां मूर्त्तिनां स्तोत्रप्रतिपादितस्वरूपाभावात् ग्रन्थासंगतेः । तीर्थंकरस्वरूपामूर्त्तिः सुन्दरतरं अतिशयेन सुन्दरमिति सुन्दरतरं निरूपममित्यर्थः । कल्याणं मोक्षसुखं च विदधातु ददातु । कीदृशी मूर्तिः ? इष्टानिष्टवियोगयोगहरिणी इष्टं चानिष्टं च इष्टानिष्टे वियोगश्च योगश्च वियोगयोगौ इष्टानिष्टयोः वियोगयोगौ इष्टानिष्टवियोगयोगौ, हरतीति हरिणी इष्टानिष्टवियोगयोगहरिणी । इष्टं वाञ्छितवस्तु न वाञ्छितं तद्विपरीतं अनिष्टं, वियोगः अप्राप्तिः, योगः प्राप्तिः, इष्टवियोगस्यानिष्टप्राप्तेः हर्त्री । पुनः कथं भूता ? कल्याणनिष्पादिनी कल्याणस्यात्यन्तिक दुःखः निवृत्तेः निष्पादयतीति निष्पादिनी संपादिनी । पुनः कीदृशी ? चिन्ताशोककुयोग रोगशमिनी, चिन्ता च शोकश्च रोगश्च तान् शमयतीति । चिन्ता मनोव्याधिः निंद्ययोगः कुयोगः चिन्तादिनिवारिणी । पुनः कथं भूता ? जनानन्दिनी जनान् मनुष्यान् आनन्दयति सुखयतीति सकलजनसुखकारिणी, पुनश्चानवरतं नित्यं मानवानां वाञ्छितश्चासौऽर्थश्च वांच्छितार्थः तं करोतीति मानववाञ्छितार्थं करणी मनुष्येप्सितार्थदायिनी । पुनः कथं भूता ? मन्दारेण संवदतीति मन्दारसंवादिनी मन्दारेण कल्पवृक्षेण संवदति विवादकरोति याचकमनोरथपूरणे मत्सदृशं तव सामर्थ्यं नास्तीति विवदति । पुनश्च सत्यं वचो अवितथवचनं तत् वदतीति सत्यंवचोवादिनी । सर्वविशेषणानामुक्तो भावो ज्ञातव्यइति ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चित्रं चेतसि वर्तते ऽद्भुतमिदं व्यापल्लताहारिणी, मूर्तिस्फूर्त्तिमतीमतीवविमलां नित्यं मनोहारिणीम् ।
विख्यातां स्नपयन्त एव मनुजाः शुद्धोदकेन स्वयं, सङ्ख्यातीततमोमलापनयतो नैर्मल्यमाबिभ्रति ॥ २ ॥

चित्रमिति । जनाः शुद्धोदकेन स्वयं मूर्तिं स्नपयन्त एव नैर्मल्यमाबिभ्रति इति संबन्धः । जना मनुष्याः शुद्धोदकेन शुद्धं च तदुदकं च शुद्धोदकं तेन निर्मलजलेन स्वयं आत्मना मूर्तिं सर्वज्ञाकृतिं स्नपयन्त एव स्नानं कारयन्त एव, एवकारेण निरुपमा ध्वान्तनिरसन समर्थतपश्चरणादिकंमकुर्वन्तोऽपि नैर्मल्यं विशुद्धिं आसमन्तात् बिभ्रति धारयन्ति । कुतः संख्यातीततमोमलापनयतः, संख्यारहितः तम एव मलः ध्वान्तमेव दोषः संख्यातीतश्चासौ तमोमलश्च तस्यापनयस्तस्मात् गणनारहिताज्ञानदोषनिरासनतः इदमद्भुतं चित्रं चेतसि वर्तते, असंभवितवस्तुनो भवनं चित्रमित्युच्यते, इदं पुरो दृश्यमानं चित्रं निरुपमपंचमहाव्रतपालनादिकारणमन्तरापि आत्मनो विशुद्ध्यादि जननात्मकं अद्भुतं नूतनं एतावत्कालपर्यन्तमेतादृशाश्चर्यदर्शनाभावात् मे मनसि प्रतिभाति । इत्यनेन प्रतिमापूजायां निरुपमं सामर्थ्यं ध्वनितं । कीदृशीं मूर्तिं ? विशेषेण आपदेव लता तां हरतीति व्यापल्लताहारिणी, दुःखापनिरातहारिणीं । पुनः कीदृशीं ? स्फूर्तिः अस्या अस्तीति स्फूर्तिमती तां प्रतिभावतीं च चमत्कृतिवर्तीं । पुनः अतिशयेन विमला बाह्यान्तरदोषरहिता तां अतीवविमलां प्रतिमाप्रदेशे बाह्यदोषरहितात्मप्रदेशे रागादिदोषरहिता चात एव सततं मनोहरतीति मनोहारिणीं, मनः प्रियां पुनश्च विख्यातां जगत्प्रसिद्धां इत्यर्थः । जगति येन भोजनं क्रियते तस्यैव मलापहरणां जायते नान्यस्य अत्र तु मूर्तेः स्नानं मलापहरणं पूजाकर्तृणामित्याश्चर्यमत्र इति ॥ २ ॥

धन्या दृष्टिरियं यया विमलया दृष्टो भवान् प्रत्यहं, धन्यासौ रसना यया स्तुतिपथं नीतो जगद्वत्सलः ।
धन्यं कर्णयुगं वचोऽमृतरसं पीतं मुदा येन ते, धन्यं हृत् सततं च येन विशदस्त्वन्नाममन्त्रो धृतः ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धन्येति । विमलया यया निर्दोषया यया दृष्टया प्रत्यहं प्रतिवासरे भवान् दृष्टस्त्वदीया मुर्तिर्यया दृष्टा सेयं दृष्टि र्धन्यता युता। यया रसनया जिह्वया जगति सृष्टौ वत्सलः प्रेमयुक्तः जगद्वत्सलः, स्तुतेः पन्था इति स्तुतिपथः तं नीतः स्तुतिं प्रापितः यया स्तवेन तव वर्णनं कृतं सेयं मदीया रसना धन्यताशालिनी । येन कर्णपुटेन ते तव संबन्धी अमृतस्य रस इव रसो यस्य तत् अमृतरसं पीयूषसदृशं वचो वचनं मुदा हर्षेण पीतं कर्णयुगलेन गृहितं तत्कर्णयुगं धन्यं धन्यता विशिष्टं । च पुनः येन हृदयेन विशदः निर्मल स्तव नाम त्वन्नाम एव मन्त्र त्वन्नामंत्रोधृतः सततं गृहीत तद्धृत् मनो धन्यं धन्यता युतं ॥ ३ ॥

**किं पीयूषमयी कृपारसमयी कर्पूरपारीमयी, किं चानन्दमयी महोदयमयी सद्ध्यानलीलामयी ।**
**तत्वज्ञानमयी सुदर्शनमयी निस्तन्द्रचन्द्रप्रभा, सारस्फारमयी पुनातु सततं मूर्तिस्त्वदीया सताम् ॥४॥**

किं पीयूषेति । त्वदीया मूर्तिः सततं सताम् पातु। तवेयं त्वदीया मूर्तिः स्वरूपं निरन्तरं सतां सज्जनानां पातु रक्षतु। कथं भूता? पीयूषमयी, किं पीयूष प्रचुरा पीयूषमयो सुधा स्वरूपा इव, पुनः कीदृशी ? कृपारसमयी कृपा एव रसः कृपारसप्रचुरा कृपारसमयी दया-रसमयी किंमु । पुनः कथं भूता ? कर्पूरपारीमयी, कर्पूरस्य पारी कर्पूरपारी प्रचुरा कर्पूरपारीमयी कर्पूरमूर्तिस्वरूपा। किं च आनन्दस्वरूपा आनन्दमयीव । पुनश्च महांश्चासौ उदयश्च महोदयः महोदयप्रचुरा महोदयस्वरूपा किं अत्युदयस्वरूपा। किं पुनश्च स च तद्ध्यानं च सद्ध्यानं सद्ध्यानस्य लीला प्रचुरा सद्ध्यानलीलामयी निर्दोषात्मस्वरूपध्यानविलासस्वरूपा किंमु ? च तस्य भावः तत्त्वं तत्त्वस्य ज्ञानं तत्त्वज्ञानं तत्त्वज्ञानप्रचुरा तत्त्वज्ञानमयी तत्त्वबोधस्वरूपा किं? । सुष्टु च तद्दर्शनं च सुदर्शनं सुदर्शनस्वरूपा सुदर्शनमयी सम्यक्त्वश्रद्धास्व-रूपेव । पुनः कीदृशी मूर्तिः ? निस्तन्द्र श्चासौ चन्द्रस्य निस्तन्द्रचन्द्रो निस्तन्द्रचन्द्रस्य प्रभा निस्तन्द्रचन्द्रप्रभा तस्याः सार स्तस्य स्फार

For Private And Personal Use Only

स्फारप्रचुरा स्फारमयी निस्तन्द्रः मेघाद्यावरणरहितेन्दुचन्द्रिका श्रेष्ठांशप्रसरणस्वरूपेव त्वदीयामूर्तिः सतां पातु रक्षत्वित्यर्थः ॥ ४ ॥

लोकालोकविभासनैकतरणिप्रायास्त्वदीयाः शुभाः, वाचो वाक्यवतामशेषविमलज्ञानं सदा तन्वते ।
संसाराम्बुधिमध्यमज्जदसुभृद्वृन्दस्य याः साम्प्रतं, पोतायन्त इव प्रहृष्टमनसस्त्वद्ध्यानमासेदुषः ॥ ५ ॥

लोकालोकेति । त्वदीयाः शुभाः वाचः वाक्यवतां सदा अशेषविमलज्ञानं तन्वते इति सम्बन्धः । तवेति त्वदीया तव संबंधिन्यः शुभाः कल्याणकारिण्यो वाचो वाग्विलासाः वाक्यमस्ति येषां ते वाक्यवन्तस्तेषां वाक्यवतां वाक्यं शास्त्रोपदेशः अस्ति येषां तेषां विद्वज्जनानां सदा सततं नास्ति शेषो यस्य तदशेषं शेषरहितं विमलं च निर्मलं च तत् ज्ञानं च विमलज्ञानं मलरहितं ज्ञानं अशेषं च तद्विमलज्ञानं च अशेषविमलज्ञानं पूर्णनिर्मलज्ञानं तन्वते विस्तारयन्ति । कथं भूताः वाचः? लोकश्चालोकाश्च लोकालोकौ चतुर्दशलोकाभ्यन्तरवर्ति बाह्यपदार्थौ तयोर्विभासनं प्रकाशकरणं तत्र एकश्चासौ तरणिश्चैकतरणि एकतरणिसदृशा एकतरणिप्राया अद्वितीयसूर्यस्वरूपा या वाचः सा । पुनश्च कथं भूता वाचः ? त्वतं वर्तमानकाले तव ध्यानं तद्ध्यानं तत् त्वय्येकचित्ततां आससादेत्यासदितवान्तस्याः सेदुषः त्वदेकचित्ततां प्राप्तस्यात एव प्रहृष्टं मनो यस्य तत् प्रहृष्टमनस्तस्य प्रहृष्टमनस आनन्दपूर्णमनस संसार एवाम्बुधिः तस्य मध्ये मज्जन्तः ये असुभृत प्राणिनः तेषां वृन्दस्य समूहस्य पोतवदाचरन्तीति पोतायन्त इव जलयानपात्र सदृशा इव ॥ ५ ॥

॥ इति श्रीमत्तपागच्छाचार्यश्रीज्ञानविमलसूरिरचितम् ॥

॥ साधारण जिनस्तोत्रं समाप्तम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ॥ अथ श्रीऋषभदेवस्तुतिगर्भितश्रीसिद्धाचलस्तोत्रम् ॥

### ॥ भुजङ्गप्रयातवृत्तम् ॥

मुनीन्द्रैः सुरेन्द्रैर्नरेन्द्रैः सदा यः, प्रगीतः प्रणीतः शमीशः स्तुतो वा ।
स्वकीयं स्वभावं स्वरूपं समेतुं, नमः श्रीयुगादीश्वरायैव तस्मै ॥ १ ॥

मुनीति । तस्मै श्रीयुगादीश्वराय नम इति संबन्धः । युगस्य आदिः तस्मिञ्जातः ईश्वरः इष्टेसौ ईश्वरः श्रीयुतश्चासौ युगादीश्वरश्च श्रीयुगादीश्वरस्तस्मै युगस्य युगप्रवृत्तेः आदि समये जात उत्पन्न ईश्वरः समर्थः तस्मै प्रसिद्धाय शोभासहितयुगादीश्वराय नमः नमोऽस्तु । कथं भूतः श्रीयुगादीश्वरः ? यः शमीनामिश्वरः शमीश्वरः ऋषीणाम् स्वामी मुनीनां पञ्चमहाव्रतीनां इन्द्रा नाथा स्तैः तथा सुराणां देवानां इन्द्रैः स्वामिभिः, तथा नराणां इन्द्रैः नाथैः, प्रकर्षेणं गीतः उत्कर्षेण गीतविषयिकृतः वाचकार्थे च प्रणीतः नमस्कृतः च स्तुतः स्तुतिविषयिकृतः । किमर्थं ? स्वस्य अयं स्वकीयः तं नपुंसकेन स्वरूपविशेषणं च स्वकीयं ज्ञानदर्शनचारित्रात्मकं स्वभावं च द्रव्यरूपतया नित्य स्वरूपं समेतुं प्राप्तुं स्तुत्यादिविषयिकृतः ॥ १ ॥

विचित्रं पवित्रं तपो येन तप्तं, न तप्तं हि गात्रे क्षितौ न प्रसुप्तम् ।
मनो गुप्तमुप्तं च सद्धर्म बीजं, नमः श्रीयुगादीश्वरायैव तस्मै ॥ २ ॥

विचित्रमिति । येन श्रीयुगादीश्वरेण विचित्रं आश्चर्यंकारकं च पवित्रं दोषरहितं तपस्तपश्चरणं तप्तं कृतं कथमाश्चर्यकारकं कया रीत्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवित्रत्वमित्युच्यते चेत् ?। श्रूयतां ! तपस्विनो हि सूर्यावलोकनादिरीत्या शरीरं तापयन्ति च भूमौ शयनं कुर्वन्ति । अस्पृश्य स्पर्शनादि परित्यजन्ति । आदितीर्थेश्वरेण तु गात्रे शरीरे न तप्तं शरीरं न तापितं च क्षितौ न प्रसुप्तं पृथिव्यां शयनं न कृतं अलौकिकरीति सत्वात् विचित्रं अस्पृश्यविष्टामूत्रादि स्पर्शपरित्यागस्नानादिरूपा पवित्रता न कृता । किन्तु गुप्तं मनः सद्धर्मबीजमुप्तं गुप्तं कामक्रोधादिभ्यो रक्षितं कामादिरहितं इयमेव पवित्रता क्रोधादीनां चंडाल त्वात् मनश्चेतः प्रतिसन्वासौ धर्मश्च तस्य बीजं सम्यक्त्वादि तूप्तं रोपितं एतादृशपवित्रतायुक्तत्वात् । लौकिकतपश्चरणरीति पवित्रताभिन्नत्वात् । विचित्रं पवित्रं तपो येन तप्तं तस्मै श्रीयुगादीश्वराय एव एवकारेणान्यासां देवतानां निषेधः नमः नमोऽस्तु ॥ २ ॥

विना चन्द्रहासं विहासं विकोपं, हतो मोहदैत्यः सपुत्रप्रपुत्रम् ।
गृहीतं स्वराज्यं चिरं कालनष्टं, नमः श्रीयुगादीश्वरायैव तस्मै ॥ ३ ॥

विनेति। येनादितीर्थकरेण चन्द्रहासं कृपाणं विना, विगतः हास्यो यस्मिन्कर्मणि यथा स्यात्तथा, विकोपं कोपरहितं विगतः कोपो यस्मिन् कर्मणि यथा स्यात्तथा विकोपं क्रोधरहितं पुत्राश्च प्रपुत्राश्च तैः सहितः यस्मिन्कर्मणि यथा स्यात्तथा सपुत्रप्रपुत्रं पुत्रपौत्रसहितं, मोह एव दैत्य मोहदैत्य अज्ञानासुरः हतः नाशितः, चिरकालनष्टं बहुकालविनष्टं स्वराज्यं कर्मरहितात्मस्वरूपप्रतिरूपं गृहीतं संपादितं, तस्मै श्री युगादीश्वरायैव नमः मम नमस्कृतिः ॥ ३ ॥

अहो ! यस्य वंशे मनुष्याः प्रभूताः, शिवानन्दभाजः प्रजाताः प्रसिद्धा ।
न तेषामपीर्ष्या न रागो न रोषो, नमः श्रीयुगादीश्वरायैव तस्मै ॥ ४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अहविति । अहो आश्चर्यं । यस्यादितीर्थेश्वरस्य वंशे अन्वये प्रसिद्धाः विख्याताः प्रभूताः बहवः मनुष्याः शिवस्य मोक्षस्य आनन्दं सुखं भजन्तीति सेवन्ते इति शिवानन्दभाजः । प्रकर्षेण जाता उत्कर्षतया मोक्षसुखसेविजनो जाताः तेषामपि वंशजातानामपि । अपिना तीर्थेश्वरस्य नस्यादत्र किमुक्तव्यं ? इर्ष्या परोत्कर्षासहनमिर्ष्या न नास्ति न रागा स्नेहो न, न रोषो द्वेषो न । अत एवाश्चर्यं तस्मै श्रीयुगदीश्वरायैव नमोऽस्तु ॥ ४ ॥

भवन्ति स्म वंशेऽपि योधाः सुबोधा, महामोहगेहे यदादर्शगेहे ।
प्रविश्य प्रलब्धं वरज्ञानरत्नं, नमः श्रीयुगादीश्वरायैव तस्मै ॥ ५ ॥

भवन्तीति । यस्य वंशेऽपि कुलेऽपि सुष्ठुशोभनो बोधो ज्ञानं येषां ते सुबोधाः योधाः भटाः भवन्ति स्म अभूवन् । यैः भटैः यस्य ज्ञानरत्नस्य आसमन्तात् दर्शः क्षयो यस्मिन् तत् यदादर्शं च तत् गेहं च गृहं च तस्मिन् यदादर्शगेहे ज्ञानरत्नक्षयग्रहरूपे महां श्चासौ मोहश्च महामोह तस्य गेहे महदज्ञानगृहे प्रविश्य वरं श्रेष्ठं ज्ञानमेव रत्नं प्रलब्धं प्राप्तं तस्मै युगादीश्वराय नमोऽस्तु । अपिना तीर्थेश्वरेणैव मोहगेहे संसारे प्रविश्य ज्ञानं प्राप्तमित्येव न किन्तु स्ववंशजैरपि ज्ञानं प्राप्तमित्यर्थः ॥ ५ ॥

न हीशा महीशा महारिं विजेतु-मृते वंशजातेर्न भूतास्तु पूर्वम् ।
भविष्यन्ति नाग्रे न सन्त्यद्य केचि-न्नमः श्रीयुगादीश्वरायैव तस्मै ॥ ६ ॥

नहीति । वंशत् जातिः जननं तस्याः वंशजातेः वंशजातेः ऋते अन्तर आदितीर्थेश्वरवंशजननं विना पूर्वं प्राक्काले महा ईशा महीशाः नयेन्द्राः भूताः मोहशत्रुविजेतारो न जाता, अग्रे नो भविष्यन्ति । अद्य वर्तमानकाले केचिन्न सन्ति के च न वर्तन्ते । तस्मात् राजानः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदितीर्थेश्वरवंशजातिमन्तरा महांश्चासौ अरिश्च महारिः, तं महत् मोहसमूं विजेतुं पराभवितुं इंद्रा समर्था न हि न सन्त्येव, तस्मै श्रीयुगादीश्वराये नमः ॥ ६ ॥

प्रशस्यं पिता यस्य माता कलत्रं, कुलं भ्रातृमित्रे पुरं पुत्रवर्गः ।
प्रजादिप्रधानं च भृत्यादिलोको, नमः श्रीयुगादीश्वरायैव तस्मै ॥ ७ ॥

प्रशस्यमिति । यस्य तीर्थेश्वरस्य पिता च माता जननी कलत्रं भार्या कुलं वंशः भ्राता च मित्रं च भ्रातृमित्रे बन्धुसुहृदौ पुरं नगरं पुत्राणाम् वर्गः पुत्रवर्गः पुत्रसमुदायः प्रजा आदिर्यस्मिन् तत् प्रजादि च तत् प्रधानं च प्रजादिप्रधानं प्रजादिमुख्यवर्गः अमात्यादिः च भृत्यः आदिर्यस्मिन्स भृत्यादिश्चासौ लोकश्च भृत्यादिलोकः किङ्करकञ्चुकिप्रमुखजनः सर्वं प्रशंसितुं योग्यं प्रशंसार्हं प्रशस्यं तस्मै श्रीयुगादीश्वरायैव नमः ॥ ७ ॥

न कस्यापि तुल्या क्षमा मार्दवं चा–र्जवं निस्पृहत्वं तपः संयमत्वम् ।
तथा सत्यशौचे धनं ब्रह्मचर्यं, नमः श्री युगादीश्वरायैव तस्मै ॥ ८ ॥

नेति। यस्य परापराधसहनं क्षमा मार्दवं मृदुता च आर्जवं सरलता, निर्गता स्पृहा यस्य स निस्पृहः तस्य भावः तत्त्वं इच्छाराहित्यं तपः तपश्चरणं संयमः योगः सम्यग् यमः इन्द्रियदमनं अस्ति अस्य तस्य भावः तत्त्वं इन्द्रियदमनं, तथा सत्यं च शौचं च सत्यशौचे नृत पावित्र्ये धनं द्रव्यं ब्रह्मणि आत्मस्वरूपे चरति संचरतीति ब्रह्मचारी तस्य भावः तत्त्वं आत्मस्वरूपज्ञानदर्शनचारित्रात्मकत्वेहत्वं, मैथुनाभावो वा इमे गुणाः कस्यापि जनस्य तुल्याः समाः न सन्ति, तस्मै श्रीयुगादीश्वरायैव नमः ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न कर्त्ता न भर्त्त । न भोक्ता न भक्तो, न रक्तो न रुष्टो न दुष्टो न हृष्टः ।
तथाप्येष नाथो भवाम्भोधिपोतः, सदा मे स आधार एकोऽस्तु देवः ॥ ९ ॥

नेति । यद्यपि एष नाथः स्वामी न कर्त्ता, अस्य कर्तृत्वं नास्ति । न भर्ता अस्य पोषकत्वं नास्ति । न भोक्ता उपभोगकर्ता न, भक्तः पूज्यतारूप श्रद्धावत्वं तदपि नास्ति । न रक्तः रतिः प्रीतिवत्वं रक्तत्वं तदपि नास्ति, न रूष्टः न क्रुद्धः परहानिकरणे बुद्धि दुष्टत्वं तदपि नास्ति, न हृष्ट नानन्दयुक्तः, तथापि पूर्वोक्ताभावेऽपि एष स्वामी भवः संसारः एवांभोधिः समुद्र तस्य पोतः नौरहित तस्मात्स देवः सदा सततं मे ममः एकः अद्वितीय आधारः आश्रयः अस्तु ॥ ९ ॥

न देशे न देहे न गेहे गहिण्यां, न राज्ये न कार्ये न ते प्रेमबन्धः ।
तथापि प्रियस्त्वं सतां त्यक्ततृष्णः सदा मे स आधार एकोऽस्तु देवः ॥ १० ॥

नेति । ते तव देशे विषये नास्ति प्रेम्णः बन्धः प्रेमबन्धः स्नेहबन्धः, तथा देहे नास्ति गेहे गृहे नास्ति, गृहिण्यां गृहं अस्याः अस्ति सागृहिणी तस्यां भार्यायां प्रेमबन्ध नास्ति, राज्ये नास्ति, कार्ये राज्यसंबन्धिकार्ये ते प्रेमबन्धः नास्ति। तथापि स्नेहाभावेऽपि त्यक्ताः तृष्णा येन सत्यक्त तृष्णस्त्यक्तस्पृहः त्वं सतां सज्जानानां प्रियः प्रीतिपात्र असि । स देवः सदा मे एक आधार अस्तु ॥ १० ॥

अहं कर्म्मपाशेन बद्धो भवाब्धौ, त्वया त्रोटितो मूलतः कर्मपाशः ।
विना त्वामुपायो न कोऽप्यस्ति लोके, सदा मे स आधार एकोऽस्तु देवः ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अहमिति । अहं भवः एव अब्धिः तस्मिन्भवाब्धौ संसारे कर्म एव पाशस्तेन कर्मबन्धेन बद्धोऽस्मि । स कर्म एव पाशः कर्मपाशः कर्मबन्धनं त्वया भवता मूलतः समूलं त्रोटितः । त्वां विना त्वद् विना लोके संसारमोक्षोपायः कोऽपि नास्ति, स देव सदा मे एक आधारोऽस्तु ॥ ११ ॥

... ...दण्डैर्घटोत्पत्तिरस्ति, तथैह त्वदात्मस्वरूपोपलम्भः ।
अतोऽहेतुकार्यं न धार्यं कदाचित्, सदा मे स आधार एकोऽस्तु देवः ॥ १२ ॥

यथेति । यथा चक्रं च दण्डश्च तैश्चक्रदण्डैः घटानामुत्पत्तिः घटजननमस्ति, तथैव त्वत्तः आत्मनः स्वरूपं तस्योपलम्भः प्राप्तिरस्ति अतः कारणात् नास्ति हेतुर्यस्य तदहेतु अहेतु च तत्कार्यं च अहेतुकार्यं हेतुमन्तराकार्यजननं कदाचिन्न धार्यं न मन्तव्यं, बौधास्तु अहेतुकार्यं भवतीति प्रलपन्ति तन्मिथ्या । स देवः सदा मे एक आधारोऽस्तु ॥ १२ ॥

तव स्तोत्रगोत्रंस्मृतिध्यानहीनो-ऽप्ययं सिद्ध इत्यप्रसिद्धः प्रयोगः ।
असाधारणं कारणं तत् प्रतीतः, सदा मे स आधार एकोऽस्तु देवः ॥ १३ ॥

तवेति । तव स्तोत्रं च गोत्रं नाम च स्मृतिश्च ध्यानं च तैः हीनोऽपि रहितोऽप्ययं सिद्धः सिद्धिं प्राप्तः इति अनेन प्रकारेण प्रयोगः वाक्यरचना अप्रसिद्धः नास्ति तत् मात्कारणात् त्वं सिद्धौ असाधारणं मुख्यं कारणं हेतुः प्रतीतः अनुभूतः, स देवः सदा मे एक आधारोऽस्तु ॥ १३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जना येऽत्र मोक्ष्यन्ति मुञ्चन्ति मुक्ताः, प्रभो ! तेऽपि सर्वे भवद्ध्यानयुक्ताः ।
अतः सिद्धिसङ्गे त्वमेवासि हेतुः, सदा मे स आधार एकोऽस्तु देवः ॥ १४ ॥

जनेति ! हे प्रभो ! ये जना अत्र संसारे मोक्ष्यन्ति मुक्तिं प्राप्नुवन्ति मुक्ताः मुञ्चन्ति संसारं त्यजन्ति सर्वेऽपि ते भवतः ध्यानं तेन युक्ताः भवद्ध्यानयुक्ताः तव चिन्तवनसहिताः सन्तः मोहरहिताः भवन्ति अतः कारणात् सिद्धेः सगः सिद्धिसंगः तस्मिन् मोक्षप्राप्तौ त्वं एव । एवकारेणत्वदतिरिक्त निषेधः, हेतुः कारणं असि स देवः सदा मे एक आधारोऽस्तु ॥ १४ ॥

निषिद्धोऽपि रागो विरुद्धो न शुद्ध—स्तथापि त्वदीयो मया धीयतेऽतः ।
तवोपर्यरागो न को वीतरागः, सदा मे स आधार एकोऽस्तु देवः ॥ १५ ॥

निषिद्धेति । रागः स्नेहः निषिद्धोऽपि निषेधिकृतोऽपि विरुद्धः सिद्धिप्रतिबन्धकः न शुद्धः शुद्धतारहितः आत्ममलिनिकरणात् तथापि उक्तरीत्या निषिद्धोऽपि अतः कारणात् मया तव अयं त्वदीयः तव संबन्धीरागः प्रीतिः धीयते धार्यते, हे वीतराग ! विगतः रागो यस्मात् स वीतरागः तत्संबुद्धौ वीतराग स्नेहरहित तव उपरि नास्ति रागः इति अरागः कः? न कोऽपीति। त्वद्रागरहितः जगति नात्येव अतस्तवरागो धार्यते, स देव मे आधारोऽस्तु ॥ १५ ॥

न तं धन्यमन्यं वदन्यं च मन्ये, प्रदत्तं प्रशस्तं न ते येन भोज्यम् ।
यतः पात्रदानं निदानं शुभानां, सदा मे स आधार एकोऽस्तु देवः ॥ १६ ॥

For Private And Personal Use Only

नेति । यतः पात्रेषु दानं पात्रदानं योग्याय दानं शुभानां पुण्यानां निदानं कारणं, तस्मात् येन पुरुषेण ते तत्र प्रशस्तं सुन्दरं भोक्तुं योग्यं भोज्यं अन्नादि न प्रदत्तं नार्पितं, अन्यं दातृभिन्नं तं पुरुषं धन्यं धन्यतावादयुक्तं च वदन्यं दातारं च यस्त्वं दानपात्रीभूतः न मन्ये स देवः मे एक आधारोऽस्तु ॥ १६ ॥

॥ ऋषभस्तुतिः समाप्ता ॥

अवादीत्किलादिस्त्वनेकान्तवादी, यदाद्यं तु तीर्थेषु मध्ये त्रिलोके ।
सुशात्रुंजयाख्यं शुभाख्यं सुभाष्यं, सदा मे तदाधारमेकं सुतीर्थम् ॥ १७ ॥

अवादीति । आदिः प्रथमः एकश्चासौ अन्तश्च एकान्तस्तं वदतीति एकान्तवादी, स न भवतीत्यनेकान्तवादी, नित्यमेवनित्यं, नानित्यमेवनित्यं नायमेकान्तवादः तं न वदति यः नित्यमप्यनित्यमपि वदति स अनेकान्तवादी, आदितीर्थेश्वरः त्रयाणां लोकानां समाहारस्त्रिलोकः तस्मिन् लोकत्रये, तीर्थेषु मध्ये, किल निश्चयेन, यत्तु तीर्थमाद्यं प्रथममवादीदवदत्, सुष्ठु शत्रवः कामक्रोधादयः जीयन्ते यस्मिन् सुशात्रुंजं आख्या यस्य तत्सुशात्रुंजयाख्यं शात्रुंजयाभिधानं शुभा आख्या यस्य तत् शुभाख्यं शोभनसंज्ञं सु शोभनं भाष्यते उच्चार्यते यत् तत्सुभाष्यं तत्सुतीर्थं सुष्ठु च तत्तीर्थं च सुतीर्थं सदा सततं एकमद्वितीयं मे ममाधारभूतमस्तु ॥ १७ ॥

सुरीव्यन्तरीकिन्नरीखेचरीभिः, कुमारीसुनारीनृपान्तःपुरीभिः ।
जगे यस्य गीतं महार्थं च नित्यं, सदा मे तदाधारमेकं सुतीर्थम् ॥ १८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरीति। सुर्यश्च व्यंन्तर्यश्च किन्नर्यश्च खेचर्यश्च ताभिः सुरीव्यन्तरीकिन्नरीखेचरीभिः सुरव्यन्तरकिन्नरविद्याधरस्त्रीभिः कुमार्यश्च सुनार्यश्च नृपाणामन्तःपुर्यश्च ताभिः कुमारीसुनारीनृपान्तःपुरीभिः, कुमारिका सुन्दरस्त्री नृपाङ्गनाभिश्च नित्यं यस्य तीर्थस्य, महानर्थौ यस्य तन्महार्थं महदर्थवत् गीतं गानं जगे, तत्सुतीर्थं, सदा मे एकं आधारमस्तु ॥ १८ ॥

मुकुन्दोऽमरेन्द्रश्च विद्याधरेन्द्रो, दिनेन्द्रो यतीन्द्रो विधु, पन्नगेन्द्रो ।
मनो यत्र धत्ते त्वहं शुद्धभक्त्या, सदा मे तदाधारमेकं सुतीर्थम् ॥ १९ ॥

मुकुन्देति । मुकुन्दः कृष्णः अमराणां देवानामिन्द्रः स्वामी, च पुनः विद्यां खेचरीविद्यां धरन्तीति विद्याधरास्तेषामिन्द्रः नाथः, दिनस्येन्द्रः सूर्यः, यतीनामिन्द्रः यतीन्द्रः यतिश्रेष्ठः, विधुः चन्द्रः, पन्नगानामिन्द्रः पन्नगेन्द्रः सर्पेन्द्रः, अहं तु यत्र सिद्धाचले शुद्धा चासौ भक्तिश्च शुद्धभक्तिः तया शुद्धभक्त्या निर्मलभक्त्या मनश्चेतः धत्ते तत्सुतीर्थं मे ममैकमाधाररूपं सदाऽस्तु ॥ १९ ॥

अनन्ताः प्रशान्ता स्तुवन्तः स्मरतो, नमन्तश्चरन्तो धरन्तश्च चित्ते ।
पुनः पूजयन्तः सृजन्तो यदर्चां, सदा मे तदाधारमेकं सुतीर्थम् ॥ २० ॥

अनन्तेति । अनन्ता असंख्याताः प्रशान्ताः मुनयः यस्य अर्चा यदर्चा तां यदर्चां यद् पूजां सृजन्तीति सृजन्तः कुर्वन्तः स्तुतिविषयं कुर्वन्तीति स्तुवन्तः, स्मरन्ति स्मृतिविषयं कुर्वन्तीति स्मरन्तः, नमन्तीति नमन्तः नतिं कुर्वतः, चरन्तितीति चरंतः पर्वतोपरिपर्यटनं कुर्वन्तः, चित्ते मनसि सिद्धाचलं धरन्तः ध्यायन्तः पुनः पूजयन्तश्च यत्र तिष्ठन्ति, सदा तत्सुतीर्थं ममैकमाधारमस्तु ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न हि स्वर्गमार्गे न हि द्रङ्गदुर्गे, न हि स्वर्णभूध्रे न हि द्वीपधाऽयाम् ।
न वर्षे न वर्षाद्रिशृङ्गे परं यत्, सदा मे तदाधारमेकं सुतीर्थम् ॥ २१ ॥

नहीति । यत्सकाशात् परं श्रेष्ठं स्वर्गस्य मार्गः स्वर्गमार्गस्तस्मिन् स्वर्गपथि न हि नास्ति, द्रंगस्य दुर्गः प्राकारस्तस्मिन् द्रंगदुर्गे द्रंगप्राकारे न हि नास्ति, स्वर्णस्य भूध्रः तस्मिन् सुवर्णाचले नहि नास्ति, द्वीपस्य धात्री तस्यां द्वीपधात्र्यां द्वीपभूमौ नहि नास्ति, उभयतो जलवान् द्वीपस्तदेकदेशो वर्षे तस्मिन् न नास्ति वर्षसाद्रिः पर्वतस्तस्मिन्न नास्ति यत्र सदा मे तत्सुतीर्थमेकमाधारमस्तु ॥ २१ ॥

अनेके प्रसादाः सदाऽऽवासदा वो, ध्वजप्रान्तकम्पैर्जनानाह्वयन्ति ।
भजध्वं शिवाध्वानमेवेति यत्र, सदा मे तदाधारमेकं सुतीर्थम् ॥ २२ ॥

अनेकेति । वः युष्माकं सदा सततं आवासं स्थितिं ददतीत्यावासदाः स्थितिदाः, अनेके बहवः, प्रासादा एनं शिवस्य मोक्षस्याध्वा मार्गस्तं शिवाध्वानमेव भजध्वं भजत, इत्यनया रीत्या ध्वजानां प्रांतास्तेषां कंपाः तैः जनान् लोकानाह्वयन्ति सदा मे तत्सुतीर्थमेकमाधारमस्तु ॥ २२ ॥

सुधासाम्यभाग्वारभृतं सूर्यकुण्डं, पयोबिन्दुपास्तक्षितीशोग्ररोगम् ।
श्रितं ध्यानमग्नगगारोपकण्ठं, सदा मे तदाधारमेकं सुतीर्थम् ॥ २३ ॥

सुधेति । सुधाया अमृतस्य साम्यं तुल्यतां भजन्ति धारयन्ति सुधासाम्यभाजश्च ताः वारश्च जलानि च ताभिर्भृतं पूर्णं, पयसां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जलानां बिन्दवः कणाः तैः अपास्तं विनाशितः क्षितिपस्य राज्ञः उग्रश्चासौ रोगश्च भयंकररोगो येन तत् श्रितं च तत् ध्यानं तस्मिन्मग्नाश्च ते अनगाराश्च ते उपकण्ठे यस्य तत् स्वीकृतैकाग्रतामग्नसाधुसमीपं एतादृशं सूर्यस्य कुण्डं यत्र तीर्थे तत्सुतीर्थं मे सदाऽऽधाररूपमस्तु ॥२३॥

भवेद्यत्र राजादनीद्रुस्तु युक्तः, शिवाकाङ्क्षिभिः साधुभिर्ज्ञाततत्त्वैः ।
सुपर्वाधिपैः ख्यातसत्यप्रभावः, सदा मे तदाधारमेकं सुतीर्थम् ॥ २४ ॥

भवेति । तु पुनः यत्र तीर्थे शीवस्य मोक्षस्य आकांक्षा इच्छा अस्ति येषां ते मोक्षाभिलाषिणस्तै ज्ञातं ज्ञानविषयीकृतं तत्वं आत्मस्वरूपं यैस्ते तैस्तत्वज्ञातृभिः साधुभिः मुनिभिः युक्तः सहितः सुपर्वाणामधिपास्तैः देवेन्द्रैः ख्यातः सत्यस्य प्रभावो यस्य सः प्रसिद्धि प्रापित सत्यप्रभावः दनीद्रुनामकः राजा भवेत्स्यात् तत्सुतीर्थं मे सदाऽऽधारमस्तु ॥ २४ ॥

ऋषीणां यतः पञ्चभिः कोटिभिश्च, विधाय क्षयं कर्मणां शात्रवाणाम् ।
गतः सिद्धिसौधं मुनिः पुण्डरीको, नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २५ ॥

ऋषीति । यतः सिद्धाचलात् ऋषीणाम् मुनीनां पञ्चभिः कोटिभिश्च सार्धं, शात्रवाणां रिपुणाम् कर्मणां क्षयं विनाशं विधाय कृत्वा पुण्डरीको मुनि सिद्धेः मोक्षस्य सौधं स्थानं, तत् सिद्धि सौधं गतः प्राप्तः, तं सिद्धाचलं अहं शोभना भक्तिः सुभक्तिः तया सुभक्त्या नतोऽस्मि ॥ २५ ॥

मुनीनां तु कोटीद्वयेनैव युक्तौ, नमिर्वा विनम्याख्यसाधुः समाधिम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अलङ्कृत्य सिद्धिं वधूं प्राप यत्र, नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २६ ॥

मुनीति। यत्र पर्वते, तु पुनः, मुनीनां यतीनां कोटीद्वयं तेनैव युक्तौ नमिः साधुः वा च 'विनम्य' इति आख्या अभिधानं यस्य सः विनम्याख्यश्चासौ साधुश्च विनम्याख्यसाधु द्वौ समाधिमलंकृत्य समाधि कृत्वा सिद्धि वधूं प्राप तं सिद्धाचलं सुभक्त्यैवाहं नतोऽस्मि ॥२६॥

ययौ निर्वृत्तिं द्राविडो वालिखिल्लो, घनं कर्म हत्वा च दिक्कोटिमानैः ।
समं सारनिग्रन्थमुख्यैर्मनुष्यै-र्नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २७ ॥

ययाविति। च किं च यत्र द्रविडेभव द्राविडः द्रविडदेशजः वालिखिल्लो वालिनामा दिशां कोटिसंख्याकैर्मानैर्जातं घनं निबिडं कर्म हत्वा च विनाशयित्वैव निर्वृत्तिं मोक्षं ययौ प्राप, अहं तं सिद्धचलं सुभक्त्यैव नतोऽस्मि ॥ २७ ॥

विना यस्य यात्रां न जग्धिं करोमी-ति पूर्वे भवेऽभिग्रही यो बभूव ।
शुकः शोकमुक्तः स मुक्तिं जगाम, नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २८ ॥

विनेति । यत्र यस्य सिद्धाचलस्य यात्रां विना यात्रामकृत्वा जग्धिं भोजनं न करोमि न करिष्यामीति पूर्वे भवे पूर्वजनने अभिग्रहः नियमः अस्यास्तीति अभिग्रही यः शुकः कीरः बभूवाभूत् । सः शुकः शोकात् मुक्तः शोकमुक्तः शोकरहितः सन् मुक्तिं जगाम प्राप तं सिद्धाचलं सुभक्त्यैवहं नतोऽस्मि ॥ २८ ॥

सुनिर्वाणभाङ् नारदः पारदारा-ऽप्रसङ्गीन्दुनन्द (९१) प्रमेयैस्तु लक्षैः । ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुमुक्षुव्रजस्यैव सार्द्धं बभूव, नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ २९ ॥

मुनीति । यत्र परेषां दाराः पारदाराः परस्त्रीयः तेषां नास्ति प्रसंगो अस्येति पारदाराप्रसंगी परस्त्रीसंबन्धरहितः नारदमुनिः, तु पुनः, इन्दुश्च नंदाश्च इन्दुनन्दाः प्रमेयं येषां ते इन्दुनन्दप्रमेयास्तै इन्दुश्चन्द्र नवनन्दा ते प्रमेयं परिमाणं येषां अङ्कानां वामतो गतिरिति वचनेन एकाधिकनवतिसंख्यां कैः मोक्तु मिच्छवः मुमुक्षवस्तेषां व्रजः तस्य मुमुक्षुसमुदायस्य लक्ष्यैः सार्द्धमेव सहित एव सुष्ठु शोभनं च तन्निर्वाणं च मोक्षश्च तत् भजतीति सुनिर्वाणभाक् मोक्षभाक् बभूवाऽभवत् तं सिद्धाचलं सुभक्त्यैवऽहं नतोऽस्मि ॥ २९ ॥

अनङ्गानगारस्तथा शाम्बसाधुः, ससार्द्धाष्टकोटीव्रतित्यक्तदेहः ।
महानन्दसौख्यं च भेजे भुजाभ्यां, नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ ३० ॥

अनङ्गेति । अष्ट च ताः कोट्यश्च अष्टकोट्य अर्धेन सहिताः सार्धाः सार्धा च ताः अष्टकोट्यश्च सार्धाष्टकोट्यश्च ते व्रतिनश्च तैः सहितस्त्यक्तः देहो येन सः पंचाशतलक्षसहिताष्टकोटिमुनियुक्तत्यक्तशरीरः नास्ति अङ्गं यस्य सः अनंग अनंगश्चासौ अनगारश्च अनङ्गानगारः प्रद्युम्नमुनिः शाम्बश्चासौ साधुश्च शाम्बसाधुः शाम्बमुनिः यत्र भुजाभ्यां बाहुभ्यां महांश्चासावानन्दश्च तस्य सौख्यं मोक्षसुखं भेजे सेवितवन्तौ, अहं तं सिद्धाचलं सुभक्त्यैव नतोऽस्मि ॥ ३० ॥

शिवं स्थापने यः शुभध्यानधारी, सहस्रेण वाचंयमानां च साकम् ।
अकर्मत्वमाश्चैव लेभे हि यत्र, नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ ३१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिवमिति । यत्र च स्थापने श्रेष्ठे यः शुभं च तत् ध्यानं च तत्धारयतीति शुभध्यानधारी श्रेष्ठध्यानधारी, आश्वेवः वाचंयमानां मुनीनां सहस्रेण साकं सहितः, कर्मणामभावः अकर्मत्वं तत् शिवं मोक्षं लेभे प्राप, हि निश्चयेन, तं सिद्धाचलं सुभक्त्यैव नतोऽहं ॥ ३१ ॥

**चकाराजितस्तीर्थनाथो द्वितीयस्तथा षोडशः शान्ति सार्वश्च यत्र ।**
**चतुर्मासकं जन्तुषट्कायरक्षं, नतोऽहं सुभक्त्यैव सिद्धाचलं तम् ॥ ३२ ॥**

चकारेति । यत्र द्वितीयः अजित स्तीर्थनाथः, तीर्थेश्वरः, तथा षोडशः शान्तिनामकस्तीर्थंकरः, सर्वाभिधानतीर्थस्वामी च जन्तूनां षट्कायानां रक्षा रक्षणं यस्मिन् तत् जन्तुषट्कायरक्षं तत् षट्कायजन्तुरक्षकं, चत्वारश्च ते मासाश्च चतुर्मासास्तेषां समासश्चतुर्मासं, चतुर्मासमेव चतुर्मासकं तत् चातुर्मास्यं चकार, त्रयस्तीर्थेश्वराः कृतवन्तस्तं सिद्धाचलं सुभक्त्यैवाहं नतोऽस्मि ॥ ३२ ॥

॥ शार्दूलविक्रीडीतवृत्तम् ॥

**सिद्धाश्चार्षभसेनमुख्यजिनपत्याद्या अनन्तास्तथा, सिद्धेयुर्मुनयः समाधिसहिताः सेत्स्यन्त्यनेकेऽपि ते ।**
**यस्मिन् ये प्रबलप्रमादबहुला दुर्दान्तपापात्मका, वाञ्छा वो विबुधोदिते शिवपदे भक्त्या भजध्वं च तम् ॥ ३३ ॥**

सिद्धेति । आर्षभसेनः मुख्यः येषु ते आर्षभसेनमुख्याः जिनपतिराद्यः येषु ते जिनपत्याद्याः आर्षभसेनमुख्याश्च ते जिनपत्याद्याश्च आर्षभसेनमुख्यजिनपत्याद्याः आर्षभसेनप्रधानजिनपतिप्रथमाः अनन्ताः असंख्याताः सिद्धाः सिद्धिमन्तः, तथा समाधिना एकाग्रतया सहिताः समाधिसहिताः आत्मस्वरूपलग्नचित्ताः मुनयः ऋषयः, यस्मिन् सिद्धाचले सिध्येयुः सिद्धिं प्राप्नुयुः प्रबलश्चासौ प्रमादश्च प्रबलप्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मादः बहुलः येषु ते प्रबलप्रमादबहुलाः अत्यनवधानवन्तः ये दुर्दान्तः दुर्दान्तसंज्ञकः पापं आत्मा स्वरूपं यस्य सः दुर्दान्तः, अथवा दुःददातीति दुर्दः दुःखदः, अन्तो यस्य तत्पापं आत्मा येषां ते दुर्दान्तः पापात्मको येषु ते दुर्दान्तपापात्मकाः दुर्दान्तपापीप्रधानाः, अनेके असंख्यातास्तेऽपि च पापिनोऽपि यत्र सेत्स्यन्ति सिद्ध्यन्ति, विबुधेन विबुधविमलसूरिणा उदिते कथिते शिवस्य मोक्षस्य पदं स्थानं तस्मिन्, वः युष्माकं वाञ्छा इच्छा अस्ति चेत्, तं सिद्धाचलं भजध्वं भजत ॥ ३२ ॥

॥ इति श्रीमत्तपागणगगनाङ्गणदिनमणिभट्टारक श्रीविबुधविमलसूरि
रचितं श्रीऋषभदेवस्तुतिगर्भितश्रीसिद्धाचलस्तोत्रं समाप्तम् ॥

॥ श्रीमत्तपागच्छाचार्यश्रीविबुधविमलसूरिरचितम् ॥

## ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

॥ वंशस्थवृत्तम् ॥

श्रियायुतं पार्श्वजिनेश्वरं वरं, सुरेन्द्रवृन्दस्तुतपादपङ्कजम् ।
गुणाकरं दोषविमुक्तमानसं, मुदा स्तुवे तं जगदीशमच्युतम् ॥ १ ॥

श्रियेति । श्रिया शोभया युतं सहितं, सुराणां देवानां इन्द्राः अधिपास्तेषां वृन्दैः समूहैः स्तुतं स्तवनविषयीकृतं, पादावेव पङ्कजं कमलं यस्य सस्तं देवेन्द्रपटलस्तवितचरणकमलं, अत एव वरं सर्वेभ्यः श्रेष्ठं, गुणानां शान्त्यदीनामाकरं खनिरूपं, दोषैः क्रोधादिभिर्मुक्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यक्तं मानसं चेतो यस्य सस्तं, न च्युतः न भ्रष्टः तमच्युतं, जगतामीशं स्वामिनं तं प्रसिद्धं पार्श्वश्चासौ जिनेश्वरश्च तं पार्श्वजिनेश्वरं मुदा हर्षेण स्तुवे स्तुतिविषयं करोमि ॥ १ ॥

स्तुतिं त्वदीयां गुरुवाक्यगोचरां, प्रवक्तुमीशो जडधीरहं कथम् ? ।
न यस्य कार्ये हि विमृश्यकारिता, स एव मूर्खो विदुषा प्रगीयते ॥ २ ॥

स्तुतिमिति । जडा धीर्यस्य स मूढधीरहं गुरोर्वाचस्पते र्वाक्यानां वाक्प्रबन्धानां गोचरां विषयी भूतां, तवेयं त्वदीया त्वां तत्संबन्धिनीं स्तुतिं स्तवनं प्रवक्तुं प्रोच्चारयितुं कथमीश समर्थः ? नैव समर्थोऽस्मि ततः किमर्थमकार्यकरणे प्रवृत्तिस्तत्राह–यस्य जनस्य कार्ये कर्तव्ये विमृश्य विचार्य करोतीति विमृश्यकारी तस्य भावः विमृश्यकारिता विचार्यकारिता नास्ति हि निश्चयेन स एव मूर्खः मूढः विदुषा विद्वज्जनेन प्रगीयते प्रोच्चार्यते मूढत्वात्प्रवृत्तिरित्यनेन स्वस्य गर्वापहरणं मूढत्वेन स्वस्यासामर्थ्ये सति, केनेदं निर्मितमिति शङ्कायां शासनदेवतया किं ? इत्युत्प्रेक्षयति ॥ २ ॥

स्तवं विधायैव चित्तश्च मां विना, भवेत्कृतार्थोऽयमगान वाङ् मुखे ।
ममेति मत्वा कृपयैव हि प्रसूः, क्षणे स्तुतेः पार्श्वजिनेश्वरस्य किम् ॥ ३ ॥

स्तवेति । चित्तः एव ज्ञानबलादेव एवकारेण स्वबलस्य निषेधः, स्तवं विधाय स्तुतिं कृत्वाऽयमगानः साधुः, मां विना मम सहायतां विना कृतार्थः कथं भवेत्स्यात् ? नैव भवेत् । ममेति मत्वा मदीयोऽयमगान इति विचार्य, कृपयैव दययैव, हि निश्चयेन, प्रसूः जननी शासन



For Private And Personal Use Only

देवता स्वयं पार्श्वश्चासौ जिनेश्वरश्च तस्य स्तवं विधाय, वाचां वाणीनां मुखं यस्मिन् सः तस्मिन् क्षणे काले, जिनेश्वरे स्तुते स्तविते किं अयं मदीयो मुनिः मद्विना स्तोतुमशक्त इति विचार्य स्वयं जिनेश्वरं स्तवितवती किमीतीयमुत्प्रेक्षा इति भावः ॥ ३ ॥

**अयं विमर्शो घटते न ते कदा, त्वदागमे मातरिहैव शोभनम् ।**
**परोपकारे प्रकृतिर्ध्रुवं सतां, धुरि स्थिता त्वं हि परोकारिणाम् ॥ ४ ॥**

अयमिति। हे मातर! अयं पूर्वोक्तः ते तव विमर्शः विचारः कदा कस्मिन् अपि काले न घटते न योग्यः न युज्यते किं? अपि तु सदैव योग्यः सदैव युज्यते, तव आगमः शास्त्रं तस्मिन्त्वदागमे त्वत्शास्त्रे इहैव अस्मिन्विमर्शे एव शोभनं सुमंजसं भवेत् । सतां सज्जनानां परेषां उपकारः तस्मिन् परोपकारे प्रकृतिः स्वभावः ध्रुवं निश्चितं त्वं परोपकारिणां परोपकर्तृणां धुरि अग्रे स्थिताऽसि, हि निश्चितं परोपकारकारिण्या स्तव मत्सहायताकरणं युक्तमेवेति शासनदेवतास्तवनं कार्यसिध्यर्थं शासनदेवताबलेन स्तवनसामर्थ्यमस्ति, तथापि मनश्चञ्चलत्वात्कथं स्तुवे ? इति अधुनावदति ॥ ४ ॥

**स्तुवे कथं त्वां करुणासरित्पति-मवस्थितध्यानधिया मनस्विनाम् ।**
**धृतं क्षणं मे न मनः स्थिरं हि कै-श्चले जलेऽर्कप्रतिबिम्बमिष्यते ॥ ५ ॥**

स्तुवेति । मनस्विनां विद्वज्जनानां अवस्थिता स्थिरा चासौ ध्यानस्य धीश्च तथा विद्वज्जनसंबन्धिन्या एकाग्रबुद्धया करुणादयैव सरित्तस्याः पतिं स्वामिनं त्वां कथं कया रीत्या स्तुवे ? स्तुतिं करोमि ? । मे मया मनः चित्तं न धृतं न स्थिरीकृतं । चले चञ्चले, जले कैरपि मनुष्यै स्थिरं अचलं अर्कस्य सूर्यस्य बिम्बम् छाया इष्यते मन्यते ? अपि तु नेष्यते, यथा चले जले सूर्यबिम्बं स्थिरं न, तथा चल

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनसि तव ध्यानं स्थिरं नेति कथं स्तुवे ? इति भावः ॥ ५ ॥

तथापि चेतः प्लवगप्रबन्धने,—मुकप्रयासः क्रियते मयाऽधुना ।
जिनेशपार्श्वस्मरणस्वरूपकः, तथापिमोहक्रमशृङ्खलानिभः ॥ ६ ॥

तथापीति । तथापि चेतसश्चंचलत्वेऽपि मया अधुना वर्तमानकाले चेतः एव प्लवंगः वानरः तस्य प्रबन्धने बन्धनक्रियायां, जिनेशश्चासौ पार्श्वश्च तस्य स्मरणं स्मृतिः स्वरूपं यस्य सः पार्श्वजिनेश्वरस्मृत्यात्मकः, प्रकर्षेण तापयतीति प्रतापीता पदश्चासौ मोहस्याज्ञानस्य क्रमः चलनं तस्य शृंखलानिभः शृंखलासदृशः अमुकश्चासौ प्रयासश्च सफलप्रयासः क्रियते ॥ ६ ॥

जिनेन्द्रसत्पार्श्वरमेश्वरं वरं, तथैव शङ्खेश्वरगोडिमण्डनम् ।
अवन्तिपार्श्वं कलिकुंण्डठारणं, भजेऽन्तरीकं वरकाणसंज्ञकम् ॥ ७ ॥

जिनेति । वरं श्रेष्ठं पाश्वश्चासौ रमेश्वरश्च संश्चासौ पार्श्वरमेश्वरश्च जिनेन्द्रश्चासौ सत्पार्श्वरमेश्वरश्च तं जिनेन्द्र सत् रमेश्वरपार्श्वं । तथैव शङ्खेश्वरश्चासौ गोडिमण्डनश्च तं गोडिभूषणशंखेश्वरपार्श्वं कलिकुंडठारणं कलिकुण्डस्य अवन्तिपार्श्वं वरकाण इति संज्ञा यस्य सः तं वरकाणाभिधानं, अन्तरीकं अन्तरीक्षाख्यं पार्श्वं भजे ॥ ७ ॥

नमामि पञ्चासरपार्श्वशङ्करं, भटेवभाभो अमिभीडभञ्जनम् ।
मुढेरचिन्तामणिकोकथंभणो, इतीहितं नाभ ददस्तु विभ्रमम् ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमामीति। भटेवभाथः अभिभीडभंजनं मुढेर चिन्तामणि काकथंभणः इति रीत्या ईहितं इच्छितं नामाभिधानं जनेषु ददत्सु सत्सु धारयन्तं पंचासरे पार्श्वः पंचासरपार्श्वश्चासौ शंकरश्च तं सुखकरं पंचासरपार्श्वं नमामि नमस्करोमि ॥ ८ ॥

अहो ! अरेऽस्मिन् विषमेऽपि पञ्चमेऽ–श्वसेनवामातनुजोऽवलम्बनम् ।
भवोदधौ भीतिरतिप्रियभ्रमौ, निमज्जतां प्राणभृतां त्वमीदृशाम् ॥ ९ ॥

अहइति । अतिप्रिया भ्रमिर्यस्य स तस्मिनतिप्रियभ्रमणे भव एव उदधि स्तस्मिन्संसारसमुद्रे निमज्जन्ति बुडन्तीति निमज्जन्तस्तेषां निमज्जतां बुडन्तान् प्राणान् बिभ्रतीति प्राणभृतस्तेषां प्राणीनाम् भीतिरस्ति भयमस्ति ईदृशां भयवतां जन्तूनां अहो ! आश्चर्ये विषमे विरूद्ध अस्मिन् पञ्चमअरेऽपि पञ्चमस्य नरकदातृत्वात्तस्मिन् त्वं आधार इति आधार इति आश्चर्यं अश्वसेनस्य राज्ञः वामा भार्या तस्यास्तनोर्जातस्तनुजः पुत्रः त्वं अवलम्बनम् आधारः असि ॥ ९ ॥

सुतोऽसि मातुर्हरिभिः कृतस्तुतेः, गुणैरनन्तैः परिपूर्णवर्ष्मणः ।
तव क्षितिख्यापितकीर्तिमण्डल–स्त्वमेव मोहस्य रणाङ्गणेऽग्रणीः ॥ १० ॥

सुतोऽसीति । हरिभिः ईन्द्रैः कृता स्तुतिर्यस्य स कृतस्तुतेः कृतस्तवनस्य अनन्तैः गुणैः परिपूर्णदेहस्य तव मातुस्त्वं सुतोऽसि पुत्रोऽसि, क्षितौ भूमौ ख्यापितं प्रसिद्धं कीर्तेः मण्डलं समूहो यस्य स त्वमेव मोहस्य अज्ञानस्य रणस्य अङ्गणं, तस्मिन् युद्धस्थाने अग्रणी अग्रेसरोऽसि ॥ १० ॥

तव प्रशंसा क्रियते मया च का, न केवलज्ञानदतो विकर्मणः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभो ! यदा छद्मदशाऽभवत्तदा, भुजङ्गनाथे कमठे मनः समम् ॥ ११ ॥

तवेति । केवलं च तत् ज्ञानं च केवलज्ञानं तत् अस्ति अस्येति केवलज्ञानवान्, तस्य केवलज्ञानवतः, केवलप्रकाशवतः, विगतं कर्म यस्मात्तस्य विकर्मणः कर्मरहितस्य तव का च काऽपि चाऽप्यर्थे प्रशंसा मया न क्रियते, कर्तुं न शक्यते । कुतः ? प्रशंसा हि समदृष्टित्ववीतरागित्वादिः सा तु छद्मदशायामभूत्; इत्यर्धश्लोकेन वदति–प्रभो ! समर्थ ! यदा छद्मदशा अभवत्तदा अनुकूले भुजङ्गनाथे नागाऽधिपे प्रतिकूले कमठे च ते मनः चित्तं समं समदृष्टिवदभवत् यत्पूर्वं तदेव केवलदशायामाधिक्याभावात्का वा प्रशंसा मया कार्या ? कर्तुं न शक्यते, इत्यनेनान्येषां छद्मदशायां समदृष्टित्वाभावात्तव समदृष्टित्वाभावात्महती प्रशंसा इति व्यंग्यं सूचयति ॥ ११ ॥

स्वतीर्थसम्पत्प्रतिपादनक्षमे, मनो मदीयं भवदीयपत्कजे ।
सदा वदान्ये हि रमस्व शाश्वते, यतो न याचे भवतः पुरोऽधिकम् ॥ १२ ॥

स्वतीर्थेति । स्वस्य तीर्थं स्वकीयशास्त्रं तस्य संपत्तस्याः प्रतिपादनं निरूपणं तस्मिन्क्षमे समर्थे, भवतः इमौ भवदीयौ पदावेव के जातं कजं कमलं भवदीयचरणकमले, मदीयं मनः सदा सततं रमस्व, रममाणं भवतु, हि निश्चये कीदृशे वदान्ये दातरि, पुनः कीदृशे शाश्वते नित्ये यतश्चरणकमलादधिकं, भवतः पुरः भवतः सकाशे न याचे याचनां न करोमि ॥ १२ ॥

नमस्कृतेरास्यविधोरभूदही–श्वरो, विभो ! यस्य विहाय तं कचित् ।
भवादृशं स्वामिनमिष्टदायिनं, जनाः क चान्यत्र सुखाद्भ्रमन्ति किम् ॥ १३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमस्कृतेति । विभो ! समर्थ ! यस्य पार्श्वतीर्थेश्वरस्य आस्यमेव मुखमेव विधुश्चन्द्र तस्य नमस्कृतेः नमस्करणात्, अहीनां सर्पाणामीश्वरः स्वामी अभूत्; तं भवादृशं भवत्स्वरूपं, इष्टं ददातीति इष्टदायी तं इष्टदातारं, स्वामिनं नाथं, क्वचित् स्थानान्तरे विहाय त्यक्त्वा जनाः मनुष्या अन्यत्र क च अन्यक्वचित्स्थाने सुखात् सुखप्राप्त्यर्थं भ्रमन्ति किं ? अपि तु न भ्रमन्ति ॥ १३ ॥

यथा कथायां नृपते रतिस्तव, तथा प्रभोः पार्श्वजिनेश्वरस्य किम् ?
यथा व्यथायां वपुषो रतिर्भवे, तथा कथं नाथ ! नुतिर्विधास्यते ? ॥ १४ ॥

यथेति । यथा येन प्रकारेण नृपतेः राज्ञः कथायां जनस्य रतिः, तथा प्रभोः समर्थस्य, पार्श्वश्चासौ जिनेश्वरश्च तस्य तव कथायां रतिर्भवति किं ? अपि तु न भवति । यथा वपुषः व्यथायां जातायां भवे संसारे रतिः प्रतिभाति, तथा त्वयि रतिरस्ति किं ! अपि तु न । नाथ ! स्वामिन् ! नतिं रतेः कारणत्वात् रत्यभावे नुतिः नतिः कथं ? कयारीत्याविधास्यते, कर्तुं शक्यते ? अपि तु न शक्यते. नतेरभावे इष्टाभावः तस्मादिष्टप्राप्त्यर्थं रतिपूर्वकनतिस्तुभ्यं जनैः कार्येति भावः ॥ १४ ॥

गुणाय भक्तेष्टविधायिनस्तव, सुसंस्तवो दूरतरेऽस्तु सेवना ।
त्वया विरोधः कमठस्य पाप्मनः, सुदर्शनायाघविनाशकारिणे ॥ १५ ॥

गुणेति । भक्तस्येष्टं तद्विदधातीति भक्तेष्टविधायी, तस्य भक्तेष्टकर्तुस्तव सुष्ठु संस्तवः परिचयः, सोऽपि गुणाय गुणजनकः भवति, सेवना सेवा दूरतरेऽतिदूरेऽस्तु तिष्ठतु । तव सेवा गुणकारिणी भवेदत्र किमुवक्तव्यम् ? । यथा पाप्मनो दुष्टस्य कमठस्य त्वया सार्कं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विरोधः शत्रुता अघं दुःखं विनाशयतीति अघविनाशकारी तस्मै तवोपद्रवविनाशकारिणे सुदर्शनाय गुणजनकोऽभवत् । गुणाभिलाषिभिस्ततस्तव परिचयोऽपि कार्यः, गुणदातृत्वादित्यनेन तव महत्सामर्थ्यं सूचितमिति ॥ १५ ॥

**अतीन्द्रियाऽऽस्ते गुणसन्ततिस्त्वयि, प्रतीयते चर्मदृशा न सा कथम् ? ।**
**त्वदाकृती रूपमयी रमाश्रिता, विमोहितानेकशचीशचीवरा ॥ १६ ॥**

अतीति । ते तव गुणानां सन्ततिः पंक्तिः सा इन्द्रियैर्ग्रहितुमशक्यत्वाच्चर्मदृक् दृष्टि यस्य तेन चर्मदृष्टिना पुरुषेणत्वयि न प्रतीतिविषयी क्रियते, तथापि चर्मदृशा चर्मदृष्टिना, सा कथं न प्रतीयते प्रतीतिविषयी क्रियते ? । सा इति का विमोहिताः मोहे प्राप्ता अनेकाश्च शच्यः शचीषु वराः विमोहिता, अनेकशच्यः शचीवराः, यया सा विमोहिता पुलोमजा वरानेकेन्द्राणी रमया शोभया आश्रिता अंचिता रूपप्रचुरा रूपमयी तव आकृती त्वदाकृती सा तवाकृतिर्जनेन दृष्टव्या शुभत्वात्पापविनाशकत्वाच्च ॥ १६ ॥

**स्तुमोऽश्वसेनक्षितिरक्षिणं वयं, क्षणे क्षणे तं हतशात्रुदुष्कृतम् ।**
**कुलाम्बरे यस्य विलक्षणो विधु–र्भुजङ्गमाङ्कः समजायत प्रभुः ॥ १७ ॥**

स्तुमेति । क्षणे क्षणे प्रतिक्षणं हतं विनाशितं, शत्रवः रिपवः एव दुष्कृतं पापं, येन स तं प्रसिद्धं, अश्वानां सेना यस्य क्षित्याः भुवः रक्षतीति रक्षी अश्वसेनाभिधानभूपालं वयं स्तुमः स्तुतिं कुर्मः यस्य राज्ञः कुलं वंश एवाम्बरमाकाशं तस्मिन् विलक्षणः विश्वचन्द्रभिन्नः कुतः ? स तु मृगलाञ्च्छन असमर्थश्चामावास्यायां विनाशित्वात् अयं तु भुजङ्गमः सर्प अङ्को लांछनं यस्य स प्रभुः समर्थश्च एतादृशविलक्षणोः विधुः चन्द्रः समजायत उत्पन्नोऽभूत् विलक्षणचन्द्रजनिभूमित्वात्स्तुतिपात्रत्वमित्यर्थः ॥ १७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगत्प्रशस्या जननी जगत्पितु–र्महासती मन्दरशैलसन्निभा ।
त्वमेव वामे ! भुवि भानुरत्नसू–र्नमोऽस्तु तुभ्यं नृपवासवार्चिते ॥ १८ ॥

जगदिति । महती चासौ सती च महासती पतिव्रता शिरो रत्नं मन्दरश्चासौ शैलश्च तेन संनिभा मन्दरपर्वता सदृशी यथा मन्दरो वातादिभिश्चालयितुमशक्यस्तथा विटैः शिलादिभ्यश्चालयितुमशक्या अत एव मन्दरसादृश्यं जगतः पिता तस्य जगत्पितुः, तीर्थेश्वरस्य जननी माता जगति प्रशंसितुं योग्या जगत्प्रशंस्या जनप्रशंनायोग्या वामे ! भुवि भूतले भानुस्तदेव रत्नं तत्सूते भानुरत्नसूः सूर्यमणिजननी त्वमेवासि, नृपः वासव इव तेन अर्चिता पूजिता तत्संबुद्धौ नृपामराधिपपूजिते तुभ्यं नमोऽस्तु । इयं तीर्थेश्वरमातुः प्रशंसायोग्यत्वात् ॥ १८ ॥

समुद्धृताशेषजगन्निवासिको, विभुश्च्युतो द्युर्दशमादवातरः ।
मधोश्चतुर्थीदिवसे सितेतरे, प्रजापवित्रीकरणाय भूतले ॥ १९ ॥

समुध्दृवेति । सम्यक् उद्धताः अशेषाः समग्राः जगतिनिवासो येषां ते जगन्निवासिकाः जगत्वास्तव्याः, येन स विभुः प्रभुः द्युश्चासौ दशमश्च द्युर्दशमस्तस्मात् दशमदेवलोकात् मधोः मधुमासस्य सितादितरस्तस्मिन् कृष्णपक्षे चतुर्थी चासौ दिवसश्च तस्मिन् चैत्रकृष्णचतुर्थ्यां प्रजानां पवित्रीकरणं तस्मै जनपावित्र्यार्थं भूवस्तलं तास्मिन्भूमौ अवतारः अवतरितवान् ॥ १९ ॥

मुनीश ! पौषोदशमी स्वदस्युहा, न कस्य शस्या विशदापि शासिता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनाऽजनिष्टस्तिलकस्त्रिविष्टपे, स्वमाशु यस्यां भुविसम्पदः सृजन् ॥ २० ॥

मुनीशेति । मुनीनामीशः मुनीशस्तत्संबुद्धौ ऋषीश्वर ! न विशदा न निर्मला अविशदाऽपि कृष्णपक्षीयाऽपि पौषदशमी स्वस्य दस्यून्हन्तीति स्वदस्युहा स्वकर्मचोरविनाशिनी कस्य, जनस्य शस्या प्रशस्या न शासिता न कथिता सर्वस्यापिश्रेष्ठा शासिता। यस्यां दशम्यां भुवि भूमौ सम्पदः श्रियः सृजन् ददन् जिनस्त्वं आशु शीघ्रं त्रिविष्टपे स्वर्गे तिलकभूतो भूषणरूपः अजनिष्ठः बभूव ॥ २० ॥

प्रवर्तयाऽभीरिति तीर्थमार्हतं, निशम्य लोकान्तिकदेवभारतीम् ।
सहस्यमासस्य दिने सिते शुभे, त्रिशूलिसङ्ख्यातिथिगे व्रतं न्यधाः ॥ २१ ॥

प्रवर्तयेति । नास्ति भिर्यस्य स भयरहितस्त्वं अर्हतां इदं आर्हतं तत्तीर्थं प्रवर्तय, इति लोकान्तिकाश्च ते देवाश्च तेषां भारती वाणीं निशम्य श्रुत्वा सहस्यश्चासौ मासश्च तस्य पौषमासस्य, त्रिशूलमस्ति येषां ते त्रिशूलिनः एकादशरुद्रस्तेषां संख्याऽस्ति यस्यां एतादृशीया तिथी तस्यां गच्छतीति तस्मिन् एकादशीरूपे सिते शुक्ले शुभे दिने दिवसे व्रतं पंचमहाव्रतं न्यधाः धारितवान् ॥ २१ ॥

मधोश्चतुर्थीतिथिरिन्द्रादिमता–ऽसिताप्यपूर्वा भविनां प्रकाशकृत् ।
विभोर्विवस्वानिव यत्र शाश्वतै–रनन्तपादैरुदियाय केवलम् ॥ २२ ॥

मधोरिति । मधोश्चैत्रस्य चतुर्थीतिथि इन्द्रस्य दिक् पूर्वदिक् रुपा मता मान्या असिताऽपि कृष्णाऽपि अपूर्वा नूतना भवि नां भव्यानां प्रकाशं करोतीति प्रकाशकृत् प्रकाशकारिणी यत्र यस्याम् विभोः प्रभोः पूर्वस्यां सहस्रकिरणर्विवस्वानिव सूर्य इव, शाश्वतैर्नित्यः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनन्ताश्च ते पादाश्च अनन्तपादास्तैः अनन्तकिरणैः केवलं केवलज्ञानात्मकसूर्यं उदियाय उदयं प्राप ॥ २२ ॥

शुभाष्टमी श्रावणमासवासिनी, यथार्थसम्पूर्णविलासशंसिनी ।
बभूव शुभ्रा भुवनेऽहि लक्ष्मणः, सुतीर्थनाथस्य हताष्टकर्मणः ॥ २३ ॥

शुभेति । श्रावणश्चासौ मासश्च तस्मिन्वसीति श्रावणमासी या यथार्थाश्च संपूर्णाश्च ते विलासाश्च तान् शंसतीति यथार्थसंपूर्णविलासशंसिनी । सत्यसमग्रानन्दसूचिनी शुभा शुभकारीणी अष्टमी, हतानि नष्टानि अष्टकर्माणि यस्य, तस्य अहिः सर्पः लक्ष्मणं चिन्हं यस्य तस्य, सुष्टु च तत्तीर्थं च तस्य नाथः तस्य स..जस तीर्थनाथकस्य शुभ्रा शुक्ला बभूवाऽभवत् ॥ २३ ॥

अभूद्विशाखा ह्यशुभं श्यतीति सा, विशेषतो भव्यशरीरिणां तदा ।
यदात्र वामातनुजन्मनः प्रभो–र्बभूव कल्याणक पञ्चकं वरम् ॥ २४ ॥

अभूदिति । यदा यस्मिन् काले अत्र जगति प्रभोर्विभोर्वामायास्तनुस्तस्या जन्म यस्य स तस्य पार्श्वतीर्थेश्वरस्य वरं श्रेष्ठं कल्याणानां मोक्षानां पञ्चकं बभूवाऽभूत् । तदा तस्मिन्समये विशेषतो बहुशो भव्यं शरीरं येषां ते भव्यशरीरिणस्तेषां भव्यशरीरिणां भाविकजनानां अशुभं पापं श्यति खण्डयतीति सा श्रावणमासीयाष्टमी, विशेषेण श्यति पापं नाशयतीति विशाखानामवती बभूवाऽभूत्, हि निश्चयेन ॥ २४ ॥

विशाखतीयं रुचिरं वपुष्मतां, भवेद्विशाखार्थयथार्थनामभृत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अवाप यस्यां परमाः सुसम्पदो, यतो जिनेन्द्र ! स्तुमहे वयं तु ताम् ॥ २५ ॥

विशाखेति । यस्यादियं अष्टमी वपुः शरीरमस्ति येषां ते वपुष्मन्तस्तेषां वपुष्मतां देहधारीणां रुचिरं पापं विशाखति नाशयति तस्मात्, विशेषेण श्यतीति विशाखः अर्थो यस्य तत्विशाखार्थं, अर्थमनतिक्रम्य वर्तते इति यथार्थं विशाखार्थं च तत् यथार्थं च विशाखार्थं यथार्थं च तत् नाम च बिशाखार्थयथार्थनाम तत् बिभर्तीति विशाखार्थयथार्थनामभृत्, छेदनार्थयथार्थं नामवती भवेत् स्यात्, तु पुनः, यस्यां अष्टम्यां जिनेन्द्रः तीर्थेश्वरः यतः यस्मात् परमा अनतिशयाः सुसंपदः सुष्टु श्रियः अवाप प्राप, तस्मात्तां अष्टमीं वयं स्तुमहे स्तविष्यामः ॥२५॥

शतं शमानां परिपाल्य जीवितं, जगाम नाथोऽभयदोऽपुनर्भवम् ।
मनोहरानन्तचतुष्टयीश्रितं, सुरद्रुचिन्तामणिकुम्भतोऽधिकम् ॥ २६ ॥

शतमिति । अभयं ददातीति अभयदः अभीर्दः नाथः स्वामी, शमानां वर्षाणां शतं जीवितं परिपाल्य शतवर्षपर्यन्तं जीवनम् धारयित्वा, सुरद्रुश्च चिन्तामणिश्च कुम्भश्च सुरद्रुचिन्तामणिकुम्भाः तस्मात् कल्पवृक्षचिन्तामणिकामघटतः, अधिकं श्रेष्ठं मनः हरतीति मनोहरा चित्तहारिणी, अनन्तानां असंख्यानां, मुक्ततीर्थेश्वराणां या चतुष्टयी विंशाधिकचतुष्टयी चतुर्विंशतिसंख्या तयाश्रितमाश्रितं नास्ति पुनः भवः संसारः यस्मिन् तं अपुनर्भवं मोक्षं जगाम गतवान् ॥ २६ ॥

अपावि काशी भवता स्वजन्मना, क्रमाम्बुजन्यासपवित्ररेणुकः ।
[illegible]त्कण्ठितमानसा जना, न ताममुञ्चन्नुचितं हि साम्प्रतम् ॥ २७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपावीति । क्रमावेवाम्बुजे तयोर्न्यासैः पवित्रा रेणुका यस्यां चरणकमलविन्यासपवित्ररजवती काशी काशी नामनगरं भावत त्वया स्वस्य स्वकीयस्य जन्मनि तेन अपावि पवित्रीकृता, साम्प्रतं संप्रति महांश्चासौ उदयश्च तस्मिन् उत्कण्ठितं मानस येषां मोक्षाभिलाषी-चित्ताः जनाः मनुष्याः तां काशीं न अमुञ्चत् न त्यजन्ति, तदुचितं योग्यं हि निश्चितं ॥ २७ ॥

यदा जिन ! स्नानमकारि मन्दरे, यदम्बुपूरैर्हरिभिस्तदाऽऽगमत् ।
सदाभिषेकोदकधारयैव सा, नभः सरित्त्वामिह नाथ ! सेवितुम् ॥ २८ ॥

यदेति । यदा यस्मिन् काले मन्दरे मन्दराचले हरिभिः इन्द्रैः यस्याः अम्बुपूराः यद म्बुपूरास्तैर्यदुदक प्रवाहैर्जिनस्य स्नानमकारि कारितं तदा तस्मिन्काले सा नभसि सरित् नभःसरित् आकाशगङ्गा सदा सतता चासौ अभिषेकस्य स्नानस्योदकं जलं तस्य धारा च तया सततस्नानजलधारयैव एवकारेण कदाप्यत्रुटितया हे नाथ ! स्वामिन् ! त्वां भवन्तं इह भूलोके सेवितुमागमदाजगाम ॥ २८ ॥

सुपर्वनाथैर्विदधे बृहन्मह–स्त्रिविष्टपाद्यत्र परिच्छदैर्युतैः ।
अबोभवीत्सा नगरी गरीयसी, यदाऽऽददे पार्श्वजिनो महाव्रतम् ॥ २९ ॥

सुपर्वेति । यदा यस्मिन्काले यत्र नगर्यां पार्श्वश्चासौ जिनश्च पार्श्वजिनः पार्श्वतीर्थेश्वरः, महत् च तत् व्रतं च महाव्रतं तत् दीक्षामा-ददे गृहीतवान् । यत्र च त्रिविष्टपात्स्वर्गादागत्य परिच्छदैः सेवकैर्युतैः सहितैः सुपर्वाणां नाथास्तै र्देवनाथैः बृहत् महत्महः महोत्सवः विदधे अकारि सा नगरी गरीयसी सर्वनगरीश्रेष्ठाऽबोभवीत् अभवत् ॥ २९ ॥

तिरस्कृतश्याममणिच्छविच्छवि–ज्वलत्तऽदन्ततविद्युतिस्तनुः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुदेशनागर्जितनिःस्वना प्रभो–र्घनागतिर्भव्यमनोरथास्पदे ॥ ३० ॥

तिरस्कृतेति । तिरस्कृता तर्जिता श्याममणीनां च्छविर्यया सा तिरस्कृताऽश्याममणिच्छविः च्छविश्चासौ ज्वलन्ती चासौ तडिश्च तदिव दन्तानां ततेर्द्युतिः यस्या, सा च तिरस्कृतातर्जिता नीलमणीनां कान्तिर्यया एतादृशी कान्तिर्यस्याः, एतादृशी चासौ देदीप्यमानवै- द्युत्सदृशी दन्तानां कान्ति र्यस्याः सा च सुष्टु देशनाया उपदेशस्य गर्जितं गर्जनैवनिःस्वनो स्तनितं यस्याः प्रभोस्तीर्थेश्वरस्य तनुः देहरूपा घनस्य मेघस्य आगति आगमनं भव्यानां पुण्यशालीनां मनोरथा इच्छा प्रवाहास्तदेवास्पदं स्थानं तस्मिनभवत् मेघपक्षे ज्वलत्तडि- देवदन्ततति: द्युतिर्यस्याः सुदेशनेव गर्जितनिःस्वनो यस्या अन्यत् पूर्ववत् ॥ ३० ॥

सुनिश्चलध्याननिलीनमानसः, कृतोपसर्गः कमठेन पाम्पना ।
यदा तदाऽभूत्परमं हि केवलं, तवेक्षमाणं भवचक्र नर्तनम् ॥ ३१ ॥

सुनिश्चलेति । सुनिश्चलं चलनारहितं च तद्ध्यानं चैकाग्रता च तस्मिन् निलीनं मग्नं मानसं चित्तं यस्य तस्य तव पाम्पना पापिना कमठेन कमठनामकेन, यदा यस्मिन्समये कृतश्चासौ उपसर्गश्च कृतोपसर्गः कृतोपद्रवः, तदा तस्मिन्काले भवचक्रस्य संसार च क्रस्य नर्तनं नृत्यं तदीक्षते अवलोकयतीतीक्षमाणं परमं श्रेष्ठं केवलं केवलज्ञानमभूत्, हि निश्चितं ॥ ३१ ॥

अशोकदिव्यध्वनिपुष्पचामरा–तपत्र सिंहासनदुन्दुभिप्रभम् ।
अदोऽष्टकं ते प्रतिहाररूपकं, सदा समीपं सुरपूज्य ! सेवते ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशोकेति । अशोकश्च अशोकवृक्षश्च दिव्यध्वनयश्च दिव्यगीतानि च पुष्पाणि च कुसुमानि च चामरे च बालव्यजने च आतपत्रं च छत्रं च सिंहासनं च दुन्दुभिश्च प्रभं च धर्मचक्रं च एतेषां समाहारे नपुंसकं, अदोऽष्टकं एतदष्टसंख्या [illegible] ! ते तव प्रतिहाररूपकं द्वारपालरूपकं सत् सदा सततं समीपं समीपभागं सेवते ॥ ३२ ॥

**पुरातनं कर्म मया व्यधायि यद्, विपद्दशाऽदायि भवेऽत्र येन मे ।**
**अपाचरीकृद् ह्युपकारचेतसां, शिरोमणिस्तज्जिन ! वावदीमि किम् ? ॥ ३३ ॥**

पुरातनेति । पुरातनं प्राचीनं कर्म मया यद् व्यधायि अकारि येन कर्मणा मे मह्यं विपदः दशा विपद्दशा आपद्दशा अत्र भवे अस्मिन् जन्मनि अदायि अदापि, जिन ! तीर्थेश्वर ! तत्कर्म अपाचरमपगतं करोतीति अपाचरीकृत् क्षयकृत्, हि पाद पूर्त्यर्थं, उपकारे चित्तो येषां उपकारकचित्तानां, शिरसां मणिः शिरोमणिः शिरोरत्नं वावदीमि, किं अहं दुःखदायिकर्मक्षयकृत् च उपकारिजनशिरोरत्नमिति, व्यवहारविषयो भविष्यामि किं प्रार्थनेयं ॥ ३३ ॥

**रसातले कुण्डलिलोकवासिनां, सुरालये नाकसदां क्षितौ नृणाम् ।**
**स्वकीयभार्याजनसंयुतैर्गुणैः, प्रगीयते ते गुणराशिरन्वहत् ॥ ३४ ॥**

रसातलेति । रसाया भूम्याः तलं तस्मिन् पाताले, कुण्डलिनां नागानां लोकः तस्मिन्वसन्तीति कुण्डलिलोकवासिनस्तेषां नागलोकनिवासिनां, स्वस्येमे स्वकीया भार्या च जनाश्च भार्याजना स्वकीयाश्च ते भार्याजनाश्च तैः संयुक्तास्तैः स्वकीयस्त्रीकिङ्करादि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनसहितैः गणैः, सुराणां आलयस्तस्मिन् स्वर्गे च नाकं द्यौः सद् स्थानं येषां नाकेसीदन्तीति नाकसदस्तेषां स्वगौकसां स्वकीयभार्याजनसंयुतैर्गणैः, क्षितौ वा भूमौ च नृणां मनुष्याणां स्वकीयभार्याजनसंयुतैर्गणैः अन्वहं प्रतिदिनं ते तव गुणानां राशिः गुणसमुदायप्रगीयते प्रकीर्त्यते ॥ ३४ ॥

॥ शार्दूलविक्रिडितवृत्तम् ॥

**जाग्रद्योगदशा शुभाशयवतां सद्ध्यानयुक्चेतसां, श्रीपार्श्वेश्वरसेवनां तनुमतां प्रार्श्वभिधो यक्षराट् ।**
**कल्याणं कुरुतात्सदा गुणवती पद्मावती श्रीमती, सूरिश्रीविबुधाभिधानविमलैः स्तोत्रं कृतं तत्प्रभोः ।।३५।।**

जाग्रदिति । जाग्रतौ अनिद्रौ च योगस्य समाधिः दशा स्थितिः योगदशा, शुभश्चासौ आशयश्च शुभाशयः अमलभावः, योगदशा च शुभाशयश्च जाग्रतौ च तौ योगदशाशुभाशयौ च ते स्तः येषां, सद्ध्याने शुभचितैकाग्रे, युनक्तीति सद्ध्यानयुक् चेतो येषां शुभध्यानलग्नचित्तानां, श्रिया शोभया विशिष्टः पार्श्वेश्वरस्तं सेवन्ते श्रीपार्श्वेश्वरसेविनस्तेषां पार्श्वेश्वर भक्तानां, तनु अस्ति येषां तेषां तनुमतां शरीरधारिणां 'पार्श्व' इति अभिधा संज्ञा यस्य सः पार्श्वाभिधः यक्षाणां राजा इति यक्षराट् गुह्यकेश्वरः । गुणः सन्ति अस्या सा गुणवती गुणशालिनी श्रीमती शोभायुक्ता पद्मावती सदाऽनिशं कल्याणं सुखं कुरुतात् करोतु। स चासौ प्रभुश्च तत्प्रभुस्तस्य तत्प्रभोः पार्श्वजिनेश्वरस्य सूरयश्च ते श्री विबुधाभिधानविमलाश्च तैः श्रीविबुधविमलसूरिभिः स्तोत्रं स्तवनं कृतं निर्मितं ॥ ३५ ॥

॥ इति श्रीमत्तपागणगगनाङ्गणदिनमणिभट्टारकश्रीविबुधविमलसूरिरचितं
श्रीपार्श्वनाथस्तोत्रं सम्पूर्णम् ॥



For Private And Personal Use Only

॥ अथ श्रीमत्तपागच्छाचार्यश्रीविबुधविमलसूरिविरचितम् ॥
॥ अष्टप्रकारपूजागर्भितश्रीजिनेश्वराष्टकम् ॥
॥ द्रुतविलम्बितवृत्तम् ॥

जिनपतेर्वरगन्धसुपूजनं, जनिजरामरणोद्भवभीतिहृत् ।
सकलरोगवियोगविपद्धरं, कुरु करेण सदा निजपावनम् ॥ १ ॥

जिनपतेरिति । जिनानां पतिः जिनपतिस्तस्य जिनपतेस्तीर्थेश्वरस्य, वरश्चासौ गन्धश्च वरगन्धस्तेन, सुष्ठु पूजनं सुपूजनं शोभनां पूजां, सदा सततं, करेण हस्तेन कुरु । कीदृशं पूजनं ? जनिश्च जरा च मरणं च जनिजरामरणानि उत्पत्तिवृद्धतानिधनानि तेभ्य उद्भवा चासौ भीतिश्च तां हरतीति तत् । पुनः रोगाश्च वियोगश्च विपदश्च रोगवियोगविपदः, सकलाश्च ताः रोगवियोगविपदश्च ता हरतीति तत् समग्रव्याधिवियोगापद्धरं । पुनः कीदृशं ? निजं स्वात्मनीति पावयति निजपावनं तत् ॥ १ ॥

सुमनसां गतिदायिविधायिनां, सुमनसां निकरैः प्रभुपूजनम् ।
सुमनसा सुमनोगुणसङ्गिना, जन ! विधेहि निधेहि मनोऽर्चने ॥ २ ॥

सुमनसामिति । जन ! मनुष्य ! सुष्ठु मनो येषां ते सुमनसस्तेषां विद्वज्जनानां मति कल्याणं ददतीति गतिदायिनः तान्विदधतीति गतिदायि विधायीनि तेषां, कल्याणदायिकर्तृणां सुमनसां पुष्पाणां निकरैः समूहैः, सुमनसां गुणाः तैः सङ्गो अस्य, तेन विबुधजनगुणसङ्गिना सुमनसा शुभचेतसा, प्रभोः पूजनं विधेहि कुरु अर्चने च मनः निधेहि स्थापय ॥ २ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षितितलेऽक्षतशर्मनिदानकं, गणिवरस्य पुरोक्षतमण्डलम् ।
क्षतजनिर्मितदेहनिवारणं, भवपयोधिसमुद्धरणोद्यतम् ॥ ३ ॥

क्षितितलेति । हे जन ! क्षित्याः पृथिव्यास्तलं तस्मिन्भूतले, गणिषु धरः तस्य श्रेष्ठस्य पुरः अग्रे, अक्षतं तत् मण्डलं च तत् न्यूनतारहितमण्डलं विधेहि । कीदृशं तत् ? अक्षतं च तत् शर्म च अक्षतशर्म नित्यसुखं तस्य निदानकं कारणं । पुनः कीदृशं ? क्षतजेन निर्मितश्चासौ देहश्च तं निवारयतीति निवारणं रुधिरजातशरीरोद्भववारणं। पुनः कथं भूतं संसारः एव पयोधिः समुद्रः तस्मात्सतुद्धरणं निष्कासनं तस्मिन् उद्यतं प्रवृत्तं ॥ ३ ॥

भवति दीपशिखापरिमोचनं, त्रिभुवनेश्वरसद्मनि शोभनम् ।
स्वतनुकान्तिकरं तिमिर हरं, जगति मङ्गलकारणमान्तरम् ॥ ४ ॥

भवतीति । हे जन ! त्रयाणां भुवनानां समाहारस्त्रिभुवनम्, त्रिभुवनस्य लोकत्रयस्य ईश्वर स्वामी, तस्य सद्म ग्रहं तस्मिन् जिनमन्दिरे शोभनं सुशोभितं दीपशिखायाः परिमोचनं प्रदीपज्योतिकरणं स्वस्य तनुः स्वकीयदेहः तस्य कान्ति रुचिं करोतीति तिमिरमन्धकारमज्ञानं च तत् हरतीति हरं नाशकं, जगति लोके आन्तरं अदृश्यमानं मङ्गलस्य कल्याणस्य कारणं-जनकं भवति ॥ ४ ॥

शिवतरोः फलदानपरैर्नवै-र्वरफलैः किल पूजय तीर्थपम् ।
त्रिदशनाथनतक्रमपङ्कजं, निहतमोहमहीधरमण्डनम् ॥ ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिवतरोरिति । शिवतरोः मोक्षवृक्षस्य फलदाने पराणि तत्पराणि तंर्मोक्षवृक्षफलदानतत्परैः, नवैः नूतनैः वराणि च तानि फलानि च तैः श्रेष्ठफलैस्तीर्थं पातीति तीर्थपस्तं तीर्थपं तीर्थेश्वरं, किल निश्चितं, पूजय पूजां कुरु । कीदृशं तीर्थपं ? त्रिदशनाथैः नतं क्रमपङ्कजं यस्य तं अमरनाथनमस्कृतपादपंकजं । पुनः कीदृशं ? निहतः विनाशितः मोह एवा ज्ञानमेव महीधरः पर्वतो येनऽत एव मण्डनं भूषण-भूतं, तं पूजय ॥ ५ ॥

अगरुमुख्यमनोहरवस्तुनि, स्वनिरुपाधिगुणौघविधायिनः ।
प्रभुशरीरसुगन्धसुहेतुना, रचय धूपनपूजनमर्हतः ॥ ६ ॥

अगरुमुख्येति । प्रभोः शरीरस्य सुगन्ध एव सुहेतुस्तेन प्रभुदेहसुगन्धीकरणार्थं अर्हतः भगवतः अगरुमुख्यं च तत् मनोहरवस्तु च तस्य, गुग्गुलप्रधानसुन्दरद्रव्यस्य धूपनं च तत्पूजनं च धूपनपूजनं धूपधूपनं रचय कुरु । कथं भूतस्य अर्हतः ? स्वस्य निरुपाधयश्च ते गुणौघाश्च तान्विदधातीति, तस्य स्वनिर्बाधज्ञानादिगुणकारिणः ॥ ६ ॥

सुरनदीजलपूर्णघटैर्घनै–र्घुसृणमिश्रितवारिभृतैः परैः ।
स्नपय तीर्थकृतं गुणवारिधिं, विमलतां क्रियतां च निजात्मनः ॥ ७ ॥

सुरनदीति । घनैर्दृढैः घुसृणेन चन्दनेन मिश्रितं मिलितं तत् वारि, तेन भृतैः पूर्णैः, परैः श्रेष्ठैः, सुराणां देवानां नदी गङ्गा तस्याः-जलं, तेन पूर्णाश्च ते घटाश्च तैः गुणानां वारिधिः समुद्रस्तं, तीर्थं करोतीति तीर्थकृत्, तं तीर्थेश्वरं स्नपय स्नापय च निजश्चासौ आत्मा च निजात्मा, तस्य स्वात्मनः विमलतां निर्मलतां क्रियतां कुरुतां ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनशनं तु ममास्त्विवति बुद्धितो, रुचिरभोजनसञ्चितभाजनम् ।
अनुदिनं विधिना जिनमन्दिरे, शुभमते ! बत ढौकयसु चेतसा ॥ ८ ॥

अनशनमिति । शुभा मतिर्यस्य तत्संबुद्धौ ! मम त्वनशनमस्त्विवति बुद्धितः इति निश्चयतः, रुचिरं च तत् भोजनं रुचिरभोजनम् तत्सञ्चितं यस्मिन् तच्च तद्भाजनं च रुचिरभोजनं सञ्चितभाजनं, तत्सुंदरभोज्यवस्तु पूर्णपात्रं, अनुदिनं प्रतिदिनं जिनमन्दिरे जिनालये सुचेतसा शुद्धमनसा, बत हर्षे ढौकय प्रापय ॥ ८ ॥

उपेन्द्रवज्रावृत्तम्

अष्टप्रकारां मुनिनाथपूजां, यो देहधारी विदधाति नित्यम् ।
अर्हत्पदं प्राप्य स याति मुक्तिं, तत्पूजय त्वं विबुधेस्थुरीशम् ॥ ९ ॥

अष्टप्रकारामिति । देहं शरीरं धारयतीति देहधारी शरीरधारी यः मनुष्यः नित्यं सततं अष्टप्रकारा यस्याः तां अष्टविधां मुनीनां नाथः तस्य पूजा तां तीर्थेश्वरपूजां विदधाति करोति, स जनः अर्हत्पदं प्राप्य, मुक्तिं मोक्षं याति प्राप्नोति तत्तस्मात् विबुधे तिष्ठतीति विबुधेस्थु विद्वज्जनमण्डलस्थस्त्वं ईशं भगवन्तं पूजय जिनपूजां कुरु ॥ ९ ॥

॥ इति अष्टप्रकारिपूजागर्भितजिनस्तोत्रं समासम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीमत्पण्डितकीर्तिविमलगणिशिष्य पण्डितवीरविमलगणिशिष्यपण्डित-
कुशलविमलगणिकृतम् श्रीसिद्धचक्रस्तोत्रम् ॥

॥ द्रुतविलम्बितवृत्तम् ॥

सुरनरेन्द्रनताङ्घ्रियुतं युतं, त्रिवरणातिशयात्मवि भूतिभिः ।
भविकषायनिदाघनिवारकं, शुचिगिरा प्रणमामि जिनेश्वरम् ॥ १ ॥

सुरेति । सुराश्चनराश्चर सुरनराः तेषामिन्द्रास्तेन तौं च तावंघ्री च ताभ्यां युतस्तं देवमनुष्याधिपनतपादसहितं, त्रयः वर्णा येषां ते त्रिवरणाश्च तेऽतिशयाश्च त्रिवरणातिशयास्त एव आत्मनः विभूतय स्ताभिः त्रिविधज्ञानदर्शनचारित्रात्मकातिशयस्वात्मसंपद्भिः युतं सहितं, मुक्तिदशायां कल्पवृक्षादि विभूतेरभावात्त्रिवरणविभूतिसहितत्वमुक्तं, भवीनां कषायास्त एव निदाघः, तं निवारयतीति निवारकं, भव्यकामक्रोधादिरूपग्रिष्मतापनिवारकं जिनेश्वरं तीर्थनाथं शुचिगिरा पवित्रवाचा प्रणमामि नमस्करोमिः ॥ १ ॥

सकलविश्वविभावविवर्जितान् परमनिर्मलतत्त्वमुपागतान् ।
अहमनन्तचतुष्टयसंयुतान्, शिवकृते हृदि सिद्धविभून् दधे ॥ २ ॥

सकलेति । विश्वस्य विभावा विश्वविभावाः सकलाश्च ते विश्वविभावाश्च तैर्विवर्जितास्तान् समग्रजगद्धितान्, परमं च श्रेष्ठं च मलरहितं च तत्त्वं च तत्त्वं च परमनिर्मलतत्त्वं तदुपागतान् श्रेनिर्मलात्म द्रुमप्रःरूपमाप्तान्, अनन्तं च तच्चतुष्टयं च अनन्तचतुष्टयं, तेन संयुतास्तान् असंख्यचतुष्टयी संपन्नान्, अहं शिवकृते मोक्षाय हृदि चित्ते सिद्धाश्च ते विमदश्च तान् मुक्तमभून् दधे धारयामि ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुगुणर्द्धिगुरुत्वगरीयसे, भुवनभावविभासनभानवे ।
श्रुतबलाज्जनसंशयभेदिने, जिनसमाय नमो मम सूरये ॥ ३ ॥

गुरुगुणेति । गुर्वी चासौ गुणानां ऋद्धिश्च तथा यद् गुरुत्वं तेन गरीयान् तस्मै महती या गुणसमृद्धिस्तया यद् महत्वं तेन पदार्थास्तेषां प्रकाशनं तस्मिन् सूर्यरूपाय, श्रुतस्य शास्त्रस्य बलं सामर्थ्यं तस्मात् जनानां संशयस्तं भेदयतीति जनसंशयभेदी, तस्मै मनुष्यसंशयनिवारकाय, जिनसमाय तुल्याय मम सूरये आचार्याय नमोऽस्तु ॥ ३ ॥

जिनवरागमपारगमर्थयुक्–श्रुतसमर्पणतत्परमर्थिनाम् ।
ऋजुगिरं चरणादिगुणाश्चितं, नमत वाचकमादरतो जनाः ॥ ४ ॥

जिनवरेति । हे जनाः ! मनुष्याः ! जिनवरस्य आगमः तस्य पारं गच्छतीति जिनवरागमपारगतस्तं, तीर्थेश्वरस्य यद् शास्त्रं तस्य पारं गतं, अर्थिनां आगमार्थापेक्षिणां, अर्थं युनक्तीति अर्थयुक्, तत् श्रुतसमर्पणं च तस्मिन्, तत्परस्तं अर्थसहितशास्त्राध्यापनप्रवृत्तं, ऋजुः सरला गीर्वाणी यस्य तं चरणादिगुणैरश्चितस्तं चरणादिगुणविशिष्टं यूयं वाचकमुपाध्यायं आदरतः भक्तितः नमत नतिं कुरुत ॥ ४ ॥

सकलपापनिबन्धननिर्वृता, उपशमामृतशान्तहृदोऽमदाः ।
समितिसंयमधर्मरताः शिवं, ददतु मे मुनयः प्रतिवासरम् ॥ ५ ॥

सकलेति । सकलानि च तानि पापनिबन्धानि च तेभ्यो निर्वृताः सम्पूर्णपापकारणशान्ताः, उपशम एवामृतं तेन शान्तं हृद् येषां



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शान्ति सुधाशान्तहृदयाः, नास्ति मदो येषां ते अमदा मदरहिता, समितिश्च संयमश्च समितिसंयमौ तावेव धर्मस्तस्मिन्रताः समितिसंयमादिधर्मतत्पराः, मुनयः साधवः मे मम प्रतिवासरं प्रतिदिनं शिवं मोक्षं सुखं वा ददतु प्रापयतु ॥ ५ ॥

सुगुरुदेवसुधर्मजिनोदितं, सकलभावरुचित्वमयं मम ।
कलशमादिभवं शुचिदर्शनं, भवतु मुक्तिसुखाय गुणालयम् ॥ ६ ॥

सुगुरुदेवेति । शोभनो गुरुः सुगुरुः सुष्ठुगुरुः सुगुरु एव देवः सुगुरुदेवश्चासौ सुधर्मा चासौ जिनश्च तेनोदितं सुष्ठुगुरुदेवस्वरूप-सुधर्मानामकजिनेन कथितं, वा सुगुरुश्च देवश्च सुधर्माजिनश्च तैरुदितं, सकलाः समयाश्च ते भावाश्च पदार्थाश्च तेषां रुचिर्दीप्तिः प्रकाशो यस्मिन् तत्, तु पुनः, अमयं निरोगं निष्कपटं वा, कलः मधुरश्चासौ शमादिः शान्त्यादिश्च तेन भवं जनितं गुणानामालयं स्थानं शुचि पवित्रं च तद्दर्शनं च शुचिदर्शनं, मम मुक्तेः सुखं तस्मै मोक्षप्राप्त्यर्थं भवतु ॥ ६ ॥

स्वपरबोधकरी सुखदायिनी, चरणहेतुरकृत्यनिवर्तिनी ।
सकलभावविकाशनकारिणी, हरतु संविदगम्यतमो मम ॥ ७ ॥

[illegible] स्वश्च परश्च स्वपरौ तयोः स्व[illegible] बोधमात्मस्वरूपज्ञानं करोतीति, सुखं शर्म ददातीति सुखदायिनी, [illegible] हेतुः कारणं, अकृत्यं नीचकृत्यं निवर्तयतीति अक[illegible]रिणी, सकलाश्च तेषां विकासनं प्रकाशनं करोतीति समस्तपदार्थप्रकाशकारिणी संवित् चित् ज्ञानमित्यर्थः, मम गन्तुं योग्यं गम्यं न गम्यमगम्यं निष्कासितुमशक्यं च तत्तमश्चाज्ञानं हरतु निवारयतु ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निखिलपापविरामवदेनसां, भवकलापकृतां चय रिक्तकृत् ।
सुरनरादिसुखार्पण तत्परं, भवतु सच्चरणं शरणं मम ॥ ८ ॥

निखिलेति । निखिलानि समग्राणि च तानि पापानि चाघानि तेषां विरामो निवृत्तिर्यस्मिन् तत्, भवानां जन्मनां कलापाः समूहाः तैः कृतां संपादितानां एनसां पापानां चयं समूहं, रिक्तं करोतीति, शून्यं करोति पापसमूहविनाशकृत्, सुराश्च ते देवाश्च नराश्च मनुष्याश्च ते आदिर्येषु ते सुरनरादयस्तेषां सुखस्यार्पणं तस्मिन् तत्परं देवमनुष्यादिशर्मदानप्रवृत्तं, सच्च तच्चरणं च शुभाचरणं मम शरणं रक्षणं भवतु स्याताम् ॥ ८ ॥

निचितकर्मचयेन्धनपावकं, परमलब्धिसमृद्धिसमर्पकम् ।
सकलमङ्गलमञ्जुलमन्दिरं, निजसुखाय सदाऽस्तु शुभं तपः ॥ ९ ॥

निचितेति । निचितानि संपादितानि च तानि कर्माणि च तेषां चयाः समूहाः एवेन्धनानि काष्ठानि तेषां, पावकः वह्निः पूर्वकृतपापपटलकाष्ठविनाशकरणे वह्निरूपं, परमा श्रेष्ठा चासौ लब्धिस्तेजोलब्ध्यादिश्च तस्याः समृद्धिः संपत्, तां समर्पयतीति समर्पकं दायकं सकलानि च तानि मङ्गलानि च समस्तकल्याणानि तेषां मञ्जुलं सुन्दरं च तत् मन्दिरं च स्थानं चैतादृशं शुभं शुक्लं हितकारि तपस्तपश्चरणं सदा सततं निजं च तत्सुखं च तस्मै स्वसुखायास्तु भवतु ॥ ९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ मालिनीवृत्तम् ॥

नवपदशुचिमन्त्रं सिद्धचक्राख्ययन्त्रं, भजति जपति भक्त्या यः स हत्वारि वर्गम् ।
इह जगति विशाले ऋद्धिकीर्त्ती च लब्ध्वा, व्रजति कुशलतो द्राक् सिद्धिशर्माणि वीरः ॥ १० ॥

नवपदेति । यः पुरुषो भक्त्या पूज्यबुद्ध्यात्मकस्नेहरूपया नव संख्याकानि पदानि यस्मिञ्शुचिः पवित्रश्चासौ मन्त्रश्च तं जपति, सिद्धानां मुक्तानां चक्रं पटलं सिद्धचक्रं आख्याऽभिधानं यस्य तत्सिद्धचक्राख्यं, च तत् यन्त्रं च सिद्धचक्राख्य यन्त्रं तत् भजति सेवते स वीरपुरुषोऽरीणां शत्रूणामन्तर्बहिः स्वरूपाणां हत्वा विनाशयित्वा, इह जगति अस्मिन्लोके विशाले महती ऋधिश्च समृद्धिश्च कीर्तिश्च यशश्च ते लब्ध्वा प्राप्य कुशलतः सुखेन द्राक् शीघ्रं सिद्धेः मोक्षस्य शर्माणि सुखानि तानि व्रजति प्राप्नोति ॥ १० ॥

॥ इति सिद्धचक्रस्तोत्रं समाप्तम् ॥

---

॥ श्रीमत्पण्डितकीर्तिविमलगणिशिष्यपण्डितश्रीवीरविमलगणिकृत् ॥

॥ श्री अष्टप्रकारपूजागर्भितजिनस्तोत्ररूपाष्टकम् ॥

॥ द्रुतविलम्बितवृत्तम् ॥

विमलकेवलदर्शनसंयुतं, सकलजन्तुमहोदयकारणम् ।
स्वगुणशुद्धिकृते स्नपयाम्यहं, जिनवरं नवरङ्गमयाम्भसा ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विमलेति । विमलं च निर्मलं च तत्केवलदर्शनं च केवलज्ञानं च तेन संयुतः सहितस्तं, सकलाश्च समस्ताश्च ते जन्तवश्च प्राणिनश्च तेषां महांश्चासावुदयश्च तस्य महोदयस्य कारणं जनकं तत्, अहं स्वस्य स्वकीयस्य गुणाः तेषां शुद्धिः शुद्ध्यर्थमिति स्वगुणशुद्धिकृते स्वगुणानां निर्मलता प्राप्त्यर्थं, नव संख्यांकाः वर्णाः रङ्गाः यस्मिन् तत् नवरंगं नवरंगप्रचुरं, नवरंगमयं च तदम्भश्च जलं च तेन, वा नवाश्च ते रंगाश्च नवरंगा नूतनवर्णा तत्प्रचुरं नवरंगमयं च तदंभश्च तेन नवसंख्यांकाः, नूतना वा ये वर्णास्तत् बहुलजलेन नूतनस्नेहमय-जलेन वा जिनेषु वर श्रेष्ठस्तं स्नपयामि स्नातं करोमि ॥ १ ॥

जगदुपाधिचयाद्रहितं हितं, सहजतत्त्वकृते गुणमन्दिरम् ।
विनयदर्शनकेशरचन्दनै–रमलहृन्मलहृज्जिनमर्चये ॥ २ ॥

जगदिति । जगतां भुवनानां उपाधय उपद्रवास्तेषां चयः समूहः तस्मात् रहितं शून्यं, हितं हितकारकं, गुणानां क्षमादीनां मन्दिरं स्थानं तत्, विनयपूर्वकं दर्शनं प्रत्यक्षं विनयदर्शनं, च केशरमिश्रितानि चन्दनानि केशरचन्दनानि च विनयदर्शनान्येव केशरमिश्रितचन्द-नानि वा, तैः सहजं च तत्त्वं च सहजतत्त्वार्थमिति सहजतत्त्वकृते स्वाभाविकात्मस्वरूपप्राप्त्यर्थं, अमलं निर्मलं हृत् हृदयं यस्य अमलहृत् चासौ मलं पापादिकं हरति मलहृच्चाऽसौ जिनश्च तं अर्चये पूजये ॥ २ ॥

सुकरुणासुनृतार्जवमार्दव–प्रशमशौचदमादिसुमैर्जनाः ।
परमपूज्यपदस्थितमर्चत, परमुदारमुदारगुणं जिनम् ॥ ३ ॥

सुकरुणेति । जनाः ! हे लोकाः ! सुकरुणा च शोभना कृपा च सूनृतं च प्रियं रम्यंवचनं, चार्जवं च सरलता, च मार्दवं च मृदुता, ॥ ३४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च प्रशमश्च शान्ति च, शौचं च पवित्रता च, दमश्चेन्द्रियदमनं चादिर्येषु, तानि च तानि कुसुमानि च तैः करुणादिसहितपुष्पैः, करुणा-दिमयपुष्पैर्वा, परमं च तत् श्रेष्ठं च तत् पूज्यं च तत् पूजितुं योग्यं च तत् पदं च स्थानं च, तस्मिन् स्थितस्तं परं श्रेष्ठं उदारं दातारं उदाराः श्रेष्ठाः गुणाः यस्य तं जिनं तीर्थेश्वरं अर्चत पूजयत ॥ ३ ॥

अशुभपुद्गलसञ्चयवारणं, शमसुगन्धकरं तपधूपनम् ।
भगवतस्तु पुरो हतकर्म्मणो, जयवतो यवतोऽक्षयसम्पदाम् ॥ ४ ॥

अशुभेति । तु पुनः, अशुभाः दुर्गन्धमयाः पापमयाश्च ये पुद्गलास्तेषां संचयस्य समूहस्य वारणं निवारकं तत्, शमः शान्तिरेव सुगन्धः तं करोतीति तत्, तपः एव धूपनं तत्, हतानि विनाशितानि कर्माणि येन विनाशितकर्मणः, जयः कामादिरिपुजयः अस्ति अस्यइति जयवान् तस्य जयवतः, अक्षयाश्च नाशरहिताश्च ताः सम्पदश्च तासां अयः सम्पदागमनं अस्ति अस्य अयवान्, तस्य विनाश-रहितसम्पदागमवतः भगवतः तीर्थेश्वरस्य पुरः अग्रे तपधूपनं कुरुत ॥ ४ ॥

बहुलमोहतमिस्रनिवारकं, स्वपरवस्तुविकाशकमात्मनः ।
विमलबोधसुदीपकमादधे, भुवनपावनपारगताग्रतः ॥ ५ ॥

बहुलेति । भुवनानि लोकान् पालयति पवित्रीकरोतीति भुवनपावनश्चासौ पारं संसारपारंगतः, पारगतश्च तस्य अग्रतः पुरतः बहुलं चात्यन्तं च तत् मोह अज्ञानमेवतमिस्रं च तिमिरं च तत् निवारयतीति निवारकस्तं आत्मनः जीवस्य स्वं च परं च स्वपरे, ते वस्तुनी च स्वपरवस्तुनी तयोर्विकाशं करोति प्रकाशं करोतीति तं, विमलश्चासौ निर्मलश्चासौ बोध एव ज्ञानमेव सुदीपकश्च तं आदधे स्थापयामि॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकलमङ्गलसम्भवकारणं, परममक्षतभावकृते जिनम् ।
सुपरिणाममयैरहमक्षतैः, परमया रमया युतमर्चये ॥ ६ ॥

सकलेति । अहं जिनं अर्चये । किमर्थं जिनार्चनं ? तत्राहनास्ति क्षतं विनाशो यस्या क्षतश्चासो भवश्च तस्य प्राप्तये मोक्षसुखार्थं केवलज्ञानरूपभावकृते च । कैरर्चनं ? तत्राह–शोभनाश्च ते परिणामाश्च तत्प्रचुराः सुपरिणामप्रायास्तैः सुन्दरमनोव्यापारमयैरक्षतैः । कथंभूतं जिनं ? परमं श्रेष्ठं । पुनः कीदृशं ? सकलानि समग्राणि च तानि मङ्गलानि सुखानि च तेषां संभवस्य जननस्य कारणं तत् । पुनः कीदृशं ? परमया-श्रेष्ठया रमया शोभया युतं सहितं ॥ ६ ॥

अमलशान्तिरसैकनिधि शुचि–गुणफलैर्मलदोषहरैरहम् ।
परमसिद्धिफलाय यजे जिनं, परहितं रहितं परभावतः ॥ ७ ॥

अमलेति । अहं जिनं यजे अर्चये । किमर्थं ? परमा चासौ सिद्धिश्च सैव फलं तस्मै मोक्षरूपफलाय । कीदृशं जिनं ? परस्यान्यस्य हितो हितकारकः तं । पुनः कीदृशं ? परस्य भावस्तस्मात् परोऽयमित्याशयतः रहितं शून्यं । पुनः कीदृशं ? अमलः निर्मलश्चासौ शान्तिरसश्च तस्यैकनिधिः एकसमुद्रस्तं । कैरर्चनं ? मलाश्च दोषाश्च तान्हरन्तीति मलदोषहराणि तैः शुचिगुणाः एव फलानि तैः पवित्रगुणरूपफलैः ॥ ७ ॥

सकलचेतनजीवनदायिनी, विमलभक्तिविशुद्धरसान्विता ।
भगवतः स्तुतिसारसुखाशिका, श्रमहरा महरास्तु विभो पुरः ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सकलेति । विभोः प्रभोः पुरः अग्रे भगमणिमाद्यैश्वर्यमस्यास्ति तस्य परमेश्वरस्य, स्तुतिषु स्तवनेषु सारो मुख्यभागः कीदृशी ? स एव सुखेनाश्यते खाद्यते सुखाशिका सुखभोज्यरूपा अस्तु भवतु । श्रमं संसारपर्यटनात्मकं हरतीति श्रमहरा । पुनः कीदृशी ? आमं क्रोधादिरोगं हरतीति आमहरा । पुनः सकलाश्च ते चेतनाश्च तेषां जीवनं ददातीति सकलचेतनजीवनदायिनी स्तुतिसारसुखाशिका याः समस्तप्राणीदीर्घजीवित्वकरणात् जीवनदातृत्वं संभवति । पुनश्च कदृशी ? विमला चासौ भक्तिश्च सैव विशुद्धरसस्तेनान्विता भक्तिस्वरूप-निर्मलरसयुक्ता ॥ ८ ॥

………………………………………………………………………

………………………………………………………………………॥ ९ ॥

इतीति । इह जगत्यां अत्र भूलोके ये पुरुषाः कीर्त्या यशसा विमलं निर्मलं तत्, जिनवराणां वृन्दं समूहस्तत् शुद्धो निर्मलश्चासौ भावश्च श्रद्धा च तेनेति, पूर्वोक्त रीत्याऽष्टप्रकारेण पुजयन्त्यर्चयन्ति ते वीरपुरुषाः, निजस्य स्वकीयस्य कलिमलस्य दुःखस्य हेतोः कारणस्य, कर्मणोऽन्तं नाशं विधाय कृत्वा परमाः श्रेष्ठाश्च ते गुणाश्च तत्प्रचुरस्तं मोक्षं सिद्धिं यान्ति प्राप्नुवन्ति ॥ ९ ॥

॥ इतिसिद्धचक्रस्तोत्रं सम्पूर्णं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति साधारणजैनस्तोत्रसंग्रहः समाप्तः ॥

For Private And Personal Use Only